लोकप्रियसाहित्यग्रन्थमाला - 24

# लघुपद्यप्रबन्धत्रयी

प्रधानसम्पादकः
**प्रो. राधावल्लभत्रिपाठी**

लेखकः
**प्रो. रामजीठक्कुरः**

**राष्ट्रियसंस्कृतसंस्थानम्**
मानितविश्वविद्यालयः
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम्)
नवदेहली

प्रकाशक:
कुलसचिव:
**राष्ट्रियसंस्कृतसंस्थानम्**
(मानितविश्वविद्यालय:)
56-57, इन्स्टीट्यूशनलएरिया
जनकपुरी, नवदेहली-110058
ईपीएबीएक्स : 28524993, 28521994, 2854995

e-mail : rsksrp@yahoo.com
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-60-9

प्रथमसंस्करणम् : 2010

मूल्यम् : ₹ 95/-

मुद्रक :
सेठ पेकेजिंग, नई दिल्ली - 5
मो. 9999344421

# पुरोवाक्

दिष्ट्या राष्ट्रियसंस्कृतसंस्थानस्य लोकप्रियसाहित्यग्रन्थमालायां सुकविश्रीरामजीठक्कुरकृता लघुप्रबन्धत्रयी प्रकाशमेति। अस्यां त्रय्याम् अनुशासनम्, लीलाशुकीयम्, प्रेरणापुरुषः अब्राहमलिङ्कन इति तिस्रो रचनाः विलसन्ति। अनुशासनकाव्ये कविना ठक्कुरेण उपनिषदां तत्त्वचिन्तननिश्च्योतननिःस्यन्दिनी काव्यमार्गमानीता, पुराणवचनानां रचनावलीगुम्फने मार्मिकत्वं प्रकटीकृतम्, वित्तैषणा कदर्थिता, लोकैषणायाः दुष्परिणामा अनुभवमुपनीताः। स्वच्छन्दं विविधच्छन्दसां वरणं विहितवती कवेर्लेखनी अस्मिन् काव्ये। क्वचिच्च लोकभाषाच्छन्दांसि अपि सहजं रम्यं च स्वीकृतानि। अलङ्काराणाम् अनुपमा सुषमा, सौशब्द्यम्, अर्थगौरवम् चास्मिन् काव्येऽहमहमिकया समुन्मिषन्ति। विशिष्य च भाविकालङ्कारेण दीपकस्य मणिकाञ्चनयोगो जातः। आधुनिकजीवनस्य सङ्कटं साम्प्रतिकीं स्वार्थान्धतां तृष्णातरलतां च विशदीकृत्य अन्ततः तथैव स्फीतया वाचा कविरयं हृदयङ्गमं कारयति श्रुतिसन्देशविशेषम् –

**जगर्ज मेघो दददेति तन्न**
**दमश्च दानञ्च दया च धेलिमाः।**
**त्रिरत्नमेतन्मनसाऽवधार्यताम्**
**प्रकाशते लोकपथश्च येन॥**

**दाम्यत दत्त दयध्वं**
**गर्जति गगने घनोऽपि गम्भीरम्।**
**कर्णौ प्रदत्तधीरा**
**निसर्गवाचो हृदाऽवधर्तव्याः॥**

लीलाशुकीयं नाम चरितकाव्यम्। प्राचीनसंस्कृतसाहित्ये एतादृशानि बहूनि चरितकाव्यानि सुकविभिर्विरचितानि। तथाहि राजवल्लभस्य भोजचरिते

पद्यकाव्ये महाराजस्य भोजस्य चरितम्। तथैव सन्ति आचार्यशङ्करस्य चरितमधिकृत्य विरचितानि बहूनि शङ्करदिग्विजयादीनि काव्यानि। आधुनिकयुगे महाकविना क्षमादेव्या स्वपितुः शङ्करपाण्डुरङ्गपण्डितस्य शङ्करजीवनाख्यानम् इति नाम्ना पद्यबद्धं जीवनचरितमतितरां मार्मिकं विनिबद्धम्। महाकाव्येऽथवा खण्डकाव्ये एव एतादृशकाव्यानामन्तर्भावं मत्वा प्राचीनैराचार्यैश्चरितकाव्यस्य पृथग् लक्षणं न विहितम्। परन्तु एतेषां काव्यानां वैशिष्ट्यानि परिलक्ष्य जीवनचारितकाव्यस्य पृथग् लक्षणं करणीयम्।

संस्कृतभाषायां मनीषिणं मार्क्समाश्रित्य बहवः प्रबन्धाः आधुनिकै रचनाकारैः प्राकाश्यं नीताः, तथैव पद्मशास्त्रिणः लेनिनचरितं नाम महाकाव्यं लेनिनजीवनमहागाथां प्रेरणास्पदं निरूपयति। अब्राहमलिङ्कनोऽपि तद्वदेव आधुनिकयुगनिर्मातृषु अग्रगण्यो महापुरुषः। एनमाश्रित्य संस्कृते मया न कापि रचना विलोकिता। ठक्कुरवर्येण लिङ्कनो लेखनीविषयतां नीत इति सर्वथा तमभिनन्दामि।

त्रिष्वपि काव्येषु विविधाः नवीनाः विषयवस्तुमुक्ताः जीवनदृष्टेरेकसूत्रे कविना गुम्फिताः। साहित्याकाशरवेर्भारवेर्वचांसि श्रित्वा ठक्कुरकविर्वर्ध्याप्यते-

**प्रसादरम्यौजस्वि गरीयो लाघवान्वितम्।**<br>
**साकाङ्क्षमनुपस्कारं विष्वग्गतिनिराकुलम्।**<br>
**न्यायनिर्णीतसारत्वादनपेक्षमिवागमे।**<br>
**अप्रकम्प्यतयाऽन्येषामाम्नायवचनोपमम्।**<br>
**अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम्।**<br>
**औदार्यादर्थसम्पत्तेः शान्तं चित्तमृषेरिव॥**<br>
**इदमीदृग्गुणोपेतं लब्धावसरसाधनम्।**<br>
**व्याकुर्यात् कः प्रियं वाक्यं यो वक्ता नेदृगाश्रयः॥**

महान्तं प्रतिभाविशेषं प्रकाशयन्तीयं लघुप्रबन्धत्रयी आधुनिकासंस्कृत-साहित्यस्य समृद्धिं व्यनक्तीतीति दिक्।

**–राधावल्लभः त्रिपाठी**

# आमुखम्

लघुपद्यप्रबन्धत्रयीयं कीदृशी, किमत्र सौन्दर्यम्, कोऽत्र चमत्कारः, उपहसनीया अनुपहसनीयेति वा? इत्यादिकान् प्रश्नान् विवेचयितुं 'सदसद्व्यक्तिहेतूनां सतामेव शिरसि भारमर्पयन्नयं जनः केवलं कृतिवस्तु कृतीनां काव्यप्रभेदमधिकृत्यैव किञ्चिन्निवेदयितुमिच्छति।

लघुसंग्रहेऽस्मिन् तिस्रः लघुपद्यप्रबन्धकृतयः समावेशिताः सन्ति लीलाशुकीयम्, अनुशासनम्, प्रेरणापुरुषोऽब्राहंलिङ्कनश्चेति। तत्र लीलाशुकीयम् भक्तकवेर्बिल्वमङ्गलस्य लीलाशुकनाम्ना प्रसिद्धस्य जीवनद्वयघटनामाधृत्य विरचितं विद्यते। अस्य भक्तकवेः 'लीलाशुक' इति गुरुप्रदत्तसंज्ञैव काव्यविदां समाजे सुतरां प्रसिद्धिमगात्। अयं भगवतो लीलापुरुषस्य श्रीकृष्णस्य लीलागानं वैयासकिः शुकाचार्य इव करोति स्म। लीलाशुकस्यास्य 'कृष्णकर्णामृतमि'ति भक्तिकाव्यं सुप्रथितमस्ति वैष्णवभक्तानां समाजे।

एकदा दक्षिणभारते तीर्थयात्राप्रसङ्गे नर्मदायास्तटेऽवस्थितस्य विष्णुमन्दिरस्य पावनप्राङ्गणे भावविमुग्धं गायतां भक्तानां मुखात् भक्तशिरोमणेश्चैतन्यमहाप्रभोः श्रुतिपुटे 'कृष्णकर्णामृतस्य' मधुरसरसपद्यानि प्राविशन्। स च तानि श्रुतिमनःसुखानि पद्यानि निशम्य अतीवाकृष्टमनाः तत्प्रतिलिपिं कारयित्वा सहानीतवान्। अन्यान्यपि कृष्णभक्तिप्रधानानि मुक्तपद्यान्यस्य प्रसिध्यन्ति। लीलाशुकस्यास्य जीवनकथा डॉ. एस. के. डे. महाभागेन सम्पादितस्य तिसृभिः टीकाभिः सह प्रकाशितस्य कृष्णकर्णामृतस्य टीकासु हिन्दीटीकया सह प्रकाशितस्यास्य भूमिकायां समुपलभ्यमानमस्ति। तत एव सङ्गतमर्थं विचित्य निर्मितमिदं काव्यमस्ति।

संस्कृतकाव्यशास्त्रे काव्यशब्दः बहुधा परिभाषितो दृश्यते। काव्यम् कविकर्मपर्यायः, सन्ध्यङ्गम्, पद्यप्रबन्धभेदश्चेति त्रिविधेष्वर्थेषु प्रयुज्यमानोऽयं

शब्दः समुपलभ्यते। संस्कृतपद्यप्रबन्धश्च त्रिविधः महाकाव्यम्, काव्यम्, खण्डकाव्यञ्चेति। पद्यप्रबन्धेषु 'लीलाशुकीयम्' काव्यमिति वक्तुं शक्यते। काव्यं नाम-महाकाव्य-खण्डकाव्ययोर्मध्यवर्त्तिनी पद्यप्रबन्धकृतिः कथ्यते।

अत्रैकं चरितमेव प्राध्यान्येन वर्ण्यते। नह्यत्र महाकाव्यमिव चरित्राणां पात्राणां वा बाहुल्यं भवति न वा खण्डकाव्यमिव वृत्तलाघवं जायते, किन्त्वत्र एकस्य कस्यचिन्महापुरुषस्य सम्पूर्णा जीवनघटना वर्णिता भवति। नह्यस्य प्रबन्धकाव्यस्योदाहरणमुपलभ्यते। केवलमाचार्यविश्वनाथेनास्योदाहरणद्वयं समुल्लिखितमवलोक्यते-भिक्षाटनम् आर्याविलासश्चेति। न चाधुनावधि अनयोरेकतरदपि काव्यं मम दृष्टिसरणिमापत्। साहित्यदर्पणस्य षष्ठपरिच्छेदे महाकाव्यनिरूपणात्परं काव्यमिदं परिभाषितमस्ति। तदनुसारेणात्र भाषाविभाषयोः- संस्कृतप्राकृतयोः मिश्रणम् पद्यानामेकार्थप्रवणत्वम्-मिथः समन्वयान्महावाक्यभावः इति लक्षणद्वयमावश्यकं मन्यते। नात्र सर्गविभागः सन्धिसमग्रता चापेक्ष्येते। साहित्यदर्पणस्य काव्य-खण्डकाव्ययोर्लक्षणव्याख्याने अनेके टीकाकृतः ग्रन्थकृदाशयं प्रकाशयितुं न प्राभवन्। तैरत्र भाषाविभाषयोर्विकल्पमिच्छन्ति किन्तु भाषा-विभाषयोर्द्वन्द्वसमासे उभयपदप्राधान्ये कथमिव विकल्पार्थः संभवेदिति त एव जानीयुः। अस्तु, लोकरुचिरिव काव्यशैली प्रतियुगं परिवर्त्तते। महाकविना कालिदासेन शतपद्यात्मकं खण्डकाव्यं व्यरचि, किन्तु प्रसिद्धो विद्वान् कविः गङ्गाधरशास्त्रिमहाभागः स्वकीयमलिविलासिसंलापसंज्ञकं खण्डकाव्यं खलु नवभिः सर्गैः सहस्राधिकैश्च पद्यैरपूरयत्। वस्तुतः एकचरितात्मकमेवास्य मौलिकं तत्त्वं प्रतिभाति। काव्यस्य एकचरितात्मकत्वं विष्णुधर्मोत्तरपुराणकृताऽपि समर्थितमस्ति। अस्मिन् काव्ये सर्गपरित्यागः विश्वनाथेन मन्यते, किन्त्वत्र लीलाशुकीये पञ्चभिः सर्गैः कथावस्तु वर्णितमस्ति। भाषा-विभाषयोः स्थाने कवि तद्वर्ण्यपुरुष-भाषयोः सम्मिश्रणं कृतमस्ति। यथास्थानमत्र 'कृष्णकर्णामृत' काव्यस्य कानिचित् पद्यानि 'गोविन्ददामोदर' स्तोत्रस्य च कतिपयपद्यानि समुद्धृतानि सन्ति। अत्र शापात् प्रमादात् नियतेर्वा प्रभावात् वर्णाश्रमधर्ममुपेक्षितवतो बिल्वमङ्गलस्य प्रकर्षपदवीमवाप्ता वाराङ्गनारतिः भगवतः कृपालवात् श्रीकृष्णरतिः सम्पद्यते।

अनुशासनमिति द्वितीया कृतिः बृहदारण्यकोपनिषदः कथामेकामाधृत्य निर्मिताऽस्ति। अत्र देवो मानवोऽसुरश्च अशान्तमनसः मनःशान्तिहेतवे गुरोः प्रजापतेश्चरणकमलमाश्रित्य प्रशान्ते तदाश्रमे तदाज्ञया हायनमेकं तपश्चरन्तः निर्मलचेतसः गुरुमुखात् 'द्' इत्येकमक्षरं श्रुत्वा स्वमनोऽनुकूलां शिक्षामधिगत्य कृतार्थतामासादयन्ति। लब्धगुरूपदेशाश्च ते घनगर्जनेऽपि दाम्यत, दत्त, दयध्वमिति गुरूपदेशध्वनिमाकर्णयन्ति।

तृतीया च कृतिः संयुक्तराज्यस्य अमेरिकाख्यदेशस्य राष्ट्राध्यक्षस्य अब्राहंलिङ्कनस्य जीवनवृत्तमधिकृत्य विरचिताऽस्ति। अत्र परोक्षतः स्वदेशनागरिकान् प्रत्यक्षतश्च स्वपुत्राध्यापकमुद्दिश्य कथानायकेन लिखितं काव्यमयं पत्रं समाविष्टमस्ति। अत्र लिङ्कनमहाभागः नागरिकभव्यगुणान् ग्राहयितुं स्वपुत्राध्यापकमागृह्णाति।

एकस्मिन् दैनिकपत्रे प्रकाशितं हिन्द्यामनूदितं पत्रमयकाव्यमिदम् एकत्रापणे मम दृष्टिपथमागतम् तस्यैव संस्कृतानुवादोऽत्र मया सन्निवेशितः। कथानायकस्यास्य जीवनं निःसहायस्यापि प्रकाशरेखां निक्षिपति प्रबल-संकल्पबलेन संलग्नमना निरन्तरोद्योगेन च असाधनोऽपि साधनमासाद्य सिद्धिमाप्तुं प्रभवति। एवमस्य जीवनवृत्तं समेषां प्रेरणादायीति मन्यते।

कथानायकस्य पत्रमयं काव्यमपि सन्नागरिकगुणान् वर्णयत् नैतिकान् सामाजिकांश्च गुणान् प्रोत्साहयति। चलाचलेऽस्मिन् जीवने रचनायाः आकारलाघवमपि काव्यानुरागिणो भावकान् अत्र आत्मदृष्टिं निक्षेप्तुं प्रवर्त्तयेत् इत्याशासे।

अनुशासनम्, प्रेरणापुरुषः अब्राहंलिङ्कनश्चेति कृतियुगलं खण्डकाव्ये समावेष्टुं शक्यते। लघ्वपि कथावस्तु एकार्थप्रवणैः पद्यैः निबद्धं खण्डकाव्यमिति कथ्यते। खण्डकाव्यमिदं काव्यनाम्नः पद्यप्रबन्धस्य लक्षणमेकं पद्यानामेकार्थप्रवणत्वम् अनुसरति-'खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च' इति।

विश्वनाथेन काव्यप्रबन्धस्य लक्षणद्वयं निर्दिष्टमस्ति-भाषाविभाषयो-र्मिश्रणम्, पद्यानामेकार्थप्रवणत्वम् महावाक्यभावश्चेति। तत्रैकलक्षणानुसरणं

महावाक्यभाव इति खण्डकाव्ये भवति। साहित्यदर्पणस्य अनेके टीकाकृतः साहित्यदर्पणीय खण्डकाव्यलक्षणस्य स्वेच्छया अन्यथैव व्याख्यां कृतवन्तो दृश्यन्ते। तदनुसारेण खण्डकाव्यलक्षणे काव्यपदम् महाकाव्यपरमिति मन्तव्यं भवति। खण्डकाव्यलक्षणे प्रयुक्तं काव्यपदं कथमिव महाकाव्यरूपमर्थमभिदध्यादिति न मे बुद्धिपथमायाति। मत्सम्मतौ लघुनाऽपि कथासूत्रेण निबद्धपद्यानाम् एकार्थप्रवणता महावाक्यता संभवति–यथा मेघदूतादि। टीकाकृतां व्याख्याने श्रद्धधानाः अनेके विद्वांसः मुक्तकसंग्रहेऽपि खण्डकाव्यस्य भ्रमं धारयन्ति। रामचरणतर्कवागीशकृताया 'विवृति' टीकाया उपरि 'पूर्ति' कृद् दुर्गाप्रसाद–महाशयः मेघदूतमिव ऋतुसंहारमपि खण्डकाव्यं मन्यते। तेनोच्यते–मेघदूतादि इत्यत्र आदिपदेन ऋतुसंहारादीनां ग्रहणं भवति। किन्तु मद्विचारेण लघ्वपि इतिवृत्तमादाय निर्मितं मिथः सम्बद्धपद्यकदम्बमेव खण्डकाव्यमभिधातुं शक्यते। मेघदूत इव ऋतुसंहारे पद्यानां परस्परसाकांक्षता सम्बन्धो वा नावलोक्यते। अतः अस्याः पद्यप्रबन्धत्रय्याः 'लीलाशुकीयम्' काव्यं तदितरे खण्डकाव्ये इत्येव स्वीकरणीयम्।

लब्धसम्मानेन प्राच्यविद्याविशारदेन डॉ. किशोरनाथझाशर्मणा स्वकीय बहुमूल्यसम्मत्या लघ्वीयं कृतिरपि गौरवं प्रापितेति अकारणबन्धवे तस्मै स्वकीयां हार्दिकीं कृतज्ञतां ज्ञापयत्ययञ्जनः। सादरमाभारं च प्रकटयति दिल्लीस्थराष्ट्रियसंस्कृतसंस्थानाधिकारिणः प्रति येषां सौजन्येन कृपालवेन च कृतिरियं प्रकाशमुखं द्रष्टा।

अन्ते च काव्यमर्मज्ञान् सतः कविकुलगुरुकालिदासगिरा प्रार्थयति–

**तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।**
**हेम्नः संलक्ष्यते वह्नौ विशुद्धिः श्यामिकापि वा॥** इति।

विदुषां वशंवदः
**रामजीठाकुरः**

# सम्मतिः

साहित्यविद्यानिष्णातस्य कविकर्मपटीयसो दिष्ट्या मदीयसुहृद्वरस्य आचार्यस्य श्रीमतः रामजीठाकुरमहाशयस्य लीलाशुकीयं काव्यं समधीत्य मोमुद्यमानमानसोऽस्मि। काव्येऽस्मिन् व्याकरणदृष्ट्या सुसंस्कृता सुबोधा च भाषा, पद-तदर्थयोर्लालित्यं, मौलिकस्यात एव नवीनस्य भावस्य सम्प्रेषण-मनायासेन वैदग्ध्यभणितिभङ्ग्यालङ्कृतीनां सन्निवेशः काव्यदोषराहित्यञ्च कस्यापि पाठकस्य लोचनगोचरतामासाद्य चेतः प्रसादयन्ति। कथावस्तुनि यावदुक्तोपपन्नता-अन्यूनानतिरिक्तता, भाषायां भावानुरूपता प्रस्तुतौ चानुकूलता सुशृङ्खलता सुकवेरस्य पाण्डित्यं कविकर्मणि पटिमानं च विद्योतयन्ति स्मारयन्ति च महाकवेर्भारवेर्भारतीमिमाम्-

**विविक्तवर्णाभरणा सुखश्रुतिः**
**प्रसादयन्ती हृदयान्यपि द्विषाम्।**
**प्रवर्तते नाकृतपुण्यकर्मणां**
**प्रसन्न-गम्भीरपदा सरस्वती॥**

**भवन्ति ते सभ्यतमा विपश्चितां**
**मनोगतं वाचि निवेशयन्ति ये।**
**नयन्ति तेष्वप्युपपन्ननैपुणा**
**गभीरमर्थं कतिचित् प्रकाशताम्॥14/4-5॥**

अत्र 'लीलाशुकीये' काव्ये जन्मद्वयस्य कथा विद्यते यत्राधिप्रधानपात्रं मानवीयं दौर्बल्यं वित्तैषणा-लोकैषणयोश्च प्रभावात् चारित्रिकपतनञ्च समालक्षिते भवतः। परन्तु सच्चरित्राया प्रेयस्या वारविलासिन्याः साहाय्येन भगवति कृष्णे भवति प्रधानपात्रस्य श्रद्धाभरा भक्तिरिति वैशिष्ट्यम् विलसत्यस्य

काव्यस्य। कदाचिद्रूपाजीवापि भगवतोऽनुकम्पया तरत्यस्मिन् भवसागरे–तारयति चावद्यचरितमपि स्वकीयं प्रेमपात्रमिति को भगवतो महिमानं विज्ञातुमर्हति। काव्यमिदं भारतीयपरम्परामनुसृत्य कथायाः सुखान्ततां साधयति। पूर्वजन्मनि गुरुरिव महिला सान्त्वयति यतिम्–

**'यते समुत्थानस्य कृते पतनञ्च कदाचित्,**
**भवति रोदनं नाम नियतिगत्या सुहासकृत्।**
**अनुतापं कुर्वता ग्लानिरपि प्रभुपदकमले,**
**समर्प्यते यदि कलुषराशिशमने शुभविमले।**
**तत्करुणापूरेण पावितः कृपाभाजनम्,**
**ध्रुवं जायते समधिगम्य लोके सभाजनम्।'**

अपरस्मिन् जन्मनि स एव यतिः भगवद्भक्तेः पराकाष्ठामवाप्य स्वयमेव भगवन्तं कथयति–

**'करमाक्षिपञ्च गच्छसि,**
**गच्छ समर्थोऽसि वारयेत् कस्त्वाम्।**
**जानीयां सामर्थ्यं**
**मोहन! मनसोऽपि निर्गतः स्यास्त्वम्॥'**
**'हस्तमुत्क्षिप्य यातोऽसि बलात् कृष्ण! किमद्भुतम्।**
**हृदयाद्यदि निर्यासि पौरुषं गणयामि ते॥'**

बिल्वमङ्गलः काव्यकथानायकः स्वप्रेमिकायाः कान्तासम्मितोपदेश-मासाद्य भगवन्तं व्रजनाथमपि प्रेम्णा विवशीचकार–

**प्रेम्णा निरुध्य हृदये**
**तं व्रजनाथं दयालुमासेव्यम्।**
**मुक्तस्तद् गुणगानं**
**कुर्वन् विवशीचकार गोविन्दम्॥**

एतानि पद्यानि कविवरेण्यस्य श्रीठाकुरमहाशयस्य कारयित्रीं प्रतिभां तथाविद्योतयति यथास्य विद्यापरिपाकः पूर्वजन्मकृतसुकृतस्याथ चास्मिन्

जन्मनि विद्याव्यवसायेन सह काव्यनिर्माणाभ्यासस्य साक्ष्यं प्रस्तौति। प्रतिपादयति च काव्यमिदं साधु समुत्थानस्य कृते पतनमपि कदाचित् श्रेयसे भवतीति। वैष्णवधर्मपरम्परायां प्रतिपादितमस्ति यत् शरणागतो ह्यात्मसमर्पणेन भगवदनुकम्पाभाजनं भूत्वा तत्सान्निध्यं लभते। इति।

03/09/2009 **किशोरनाथझा**

अनन्तचतुर्दशी

बिट्ठो

# विषयसूची


| | |
|---|---|
| पुरोवाक् | इ |
| आमुखम् | उ |
| सम्मतिः | क |
| 1. अनुशासनम् खण्डकाव्यम् | 1 |
| 2. अथ प्रथमः सर्गः – लीलाशुकीयं काव्यम् | 14 |
| 3. अथ द्वितीयः सर्गः – | 26 |
| 4. अथ तृतीयः सर्गः – | 34 |
| 5. अथ चतुर्थः सर्गः – | 41 |
| 6. अथ पञ्चमः सर्गः – | 57 |
| 7. प्रेरणा–पुरुषः अब्राहमलिङ्कनः | 63 |

श्रीमन्नीलसरस्वत्युग्रतारैकजटाभ्यो नमः

# अनुशासनम् खण्डकाव्यम्

( 1 )

वाचः पादसरोज-पावन-रजो लिप्त्वा स्वमस्ते मुहु-
र्ब्रूतेऽयं मधुरां कथां सुमनसो! दिव्यां पिबन्तु क्षणम्।

यस्या द्वौ कवि-भावकौ च तनयौ लोके परं विश्रुता-
वेकः सूक्तिचयं चिनोति मनसा सारग्रहीताऽपरः।।

( 2 )

पुण्येन कर्मणा लब्धनाकलोके निवासिनः।
सुधापायिनः सुरद्रुमच्छायानिषादिनः।।

( 3 )

नहि दुःखं स्वप्नेऽपि जातुचिद् ये पश्यन्तः।
नन्दनोपवनविहारिणः सुखमभ्यस्यन्तः।।

( 4 )

सुरबालाभिर्विलासिनः कामैकरसज्ञाः।
सुरा दिव्यमनसोऽपि रजोभिः कलुषितप्रज्ञाः।।

( 5 )

कामो हि यत्र रत्या सहैव सततं तिष्ठति।
पुष्पेषुणा च सुमनोधन्वा हृदयं विध्यति।।

( 6 )

अमरा अपि भोगासक्ता दुर्बलेन्द्रिया इमे।
असुरैः पराजिता जायन्ते किल सदा समे।।

( 7 )

कन्दर्पवशीभूताः कदापि, गुरुपत्नीमपि ते चाहरन्ति।
सुरराजपदं राजयन्नाम मघवाऽपि हन्त! ब्राह्मणं हन्ति।।

( 8 )

सर्वथा सुखेच्छावशीभूतचेतसो नाम देवा भवन्ति।
उद्विग्नहृदा सत्संयमाय गुरुपदं कदाचित्ते श्रयन्ति।।

( 9 )

गुरुमन्तरेण को जगति नाम
दूरीकरोति मानसतिमिरम्।
जलदेन विना भूमनस्ताप-
मपनयति कश्च सर्वतः परम्।।

( 10 )

उपदेशजलप्रक्षालनेन
मलिनं च मनो नैर्मल्यमेति।
गुरुवदनकमलतश्च्युतं
वचो मधु पिबञ्जनस्तुष्टिं समेति।।

( 11 )

इतिधिया कोऽपि देवश्चचाल
पावनाश्रमं प्रति प्रजापतेः।
काले हि रुजं प्रतिकुर्वन्तः
स्वस्थाः भवन्ति दुःखिनो न ते ।।

( 12 )

रजःक्षिप्तमानसा मानवा
इतस्ततः सततं भ्रमन्ति लोभेन चञ्चलाः।
तमोनिमीलितलोचना हृदा
भीरवः सदा वित्तमेव बहुकौशलेन किल ते धरन्ति।।

( 13 )

विक्रीय कदाचित् स्वकं मानमपि वित्तहेतवे
मनोरमामपि वधूं परैरपि हारयन्ति।
चरणानुरक्तबान्धवा हन्त! वित्तं भवन्ति
कामाभिभूयमानाश्च वित्तलवमाप्य विवेकं संत्यजन्ति।।

( 14 )

अवमानगरलमपि वा निपीय
धनमर्जयन्ति सुखमनुभवन्ति।
पुरुषा इहार्थदासत्वमेत्य
बन्धूनपि बहुधा मुदा घ्नन्ति।।

( 15 )

अर्थाय मनुजता समर्पिता
कामश्च परमलक्ष्यं सदैव।
त्यागोऽपि लाभहेतवे नाम
विनिमयो नाम पूजा न चैव।।

( 16 )

यज्ञमयं जीवनमिदञ्च विस्मृतं विस्मृता सत्यकथा।
करुणा दुर्बलता मन्यते च परवसुहरणीयं यथा तथा।।

**( 17 )**

दानं हि मूर्खता कथ्यतेऽत्र ज्ञानञ्च वञ्चनासाधनञ्च।
हा हन्त! विवेको रविः कुत्र कल-कलं श्रूयते हा धनञ्च।।

**( 18 )**

क्रोधेन समं कामेन वापि
लोभोऽपि नाम दुष्पूर एव।
शान्तिर्न चात्र भ्रान्तिः सदैव
सन्तोषस्तावद् दूर एव।।

**( 19 )**

रामोऽनु धावति स्वर्णमृगं
वैदेहि रटन् विचरति सदैव।
को वित्ततृष्णया मुक्तमनाः
सा भवति नाम दुःखप्रदैव।।

**( 20 )**

कोऽपीति चिन्तयन् मानवोऽत्र
प्राचीनयुगे व्याकुलो भवन्।
गुरुप्रजापतेराश्रमं पूत-
हृदयेन ययावाधिनातपन्।।

**( 21 )**

सत्त्वापचयाद्रजसायुतेन
तमसाऽभिभूतमतयोऽसुराश्च।
सन्तापयन्ति जनतां वृथैव
परदारधनाहरणे पराश्च।।

( 22 )

ये जराजीर्णवपुषं शिशुञ्च
योषितं युवानं वापि जनम्।
निघ्नन्ति निर्दयं विलुण्ठन्ति
कुर्वन्ति वृथा परपीडनञ्च॥

( 23 )

करुणा-सुधया सिक्तं न मनः
पश्यन् बिभेति सहसैव जनः।
हृदि वा न प्रीतिसरिता प्रवहति
क्रोधैकरसं प्रज्वलन्मनः॥

( 24 )

द्वेषानलेन दग्धं हृदयं
गर्वोद्धताश्च महतो वृथैव।
अवमानयन्ति दूषितमतयो
ह्यवसादयन्ति लोकं तथैव॥

( 25 )

परपीडयैव सुखमनुभवन्ति
ध्वंसाय तपस्तीव्रं चरन्ति।
मोहान्धकारहृतदृष्टयो हि
दुष्कर्माणश्चासुराः सन्ति॥

( 26 )

तेषामिह कश्चिद् विमलमना
वृद्धोपसेवया तमोघनाः।
उड्डीयगता विनयेन यस्य
गुरुपदस्मृतिर्जाताऽथ तस्य॥

( 27 )

आसुरवृत्त्या प्रोद्विग्नमना
सविमलमतिः सस्मार तत्र।
गुरुप्रजापतेश्चरणाब्जयुगं
शान्तिर्मनसः सम्भवति यत्र।।

( 28 )

देवमानवासुराः समे सुशान्तिहेतवे
समागताः प्रजापतेः पवित्रशान्तमाश्रमम्।
समिद्धयज्ञपावकं विनीतजन्तुसेवितम्
जगुः सुपावनी ऋचः कलञ्च यत्र बालकाः।।

( 29 )

अस्तसानुमन्तमागते रवौ सुधाम्नि तत्र
पद्मिनीमुखे विषादमुद्रिते मनोहरा।
वारुणी दिशाऽनुरागरञ्जिता मुदेव नाम
गीतमातनोति पक्षिरावतो लसन्मनाः।।

( 30 )

वनादुपागताश्च धेनवो मुदा नदन्ति हन्त
तरोरधः स्थिता लिहन्ति वत्सकान् प्रकामप्रीति।
सुरादयः समेत्य तत्र सादरं प्रजापतिम्
ववन्दिरे शिरोभिरानतैः प्रशान्तिहेतवे।।

( 31 )

प्रसन्नया दृशाऽभयं प्रदाय निर्मला गिरः
शुभाशिषामुवाच शर्मदायिनीः प्रजापतिः।
विना न पुण्यसञ्चयं स्मृतिं समेति सद्गुरुः
स सेवितो मरुस्थले सुरद्रुमायते ध्रुवम्।।

( 32 )

निवसन्त्वायुष्मन्तो
निजाश्रमेऽस्मिन् विमुच्यतां श्रान्तिः।
प्रातर्निवेदनं वः
श्रोष्ये सस्नेहमादिशच्चैतान्।।

( 33 )

पावनमाश्रममाप्ताः दृष्ट्वा सुगुरोः सुपावनौ चरणौ।
व्यपगतचिन्ताः सर्वे प्रशान्तमनसः सुलेभिरे निद्राम्।।

( 34 )

विहङ्गमारावमधुप्रवर्षके
श्रुतौ श्रुतीनां मधुरैश्च गायनैः।
मनोहरे दिव्यप्रसूनसौरभैः
सुगन्धिवातेरितपर्णपादपे।।

( 35 )

अधिप्रभातं परिदूनमानसाः
प्रजापतेस्ते समुपस्थिताः पुरः।
हिरण्यवर्णोरुजराविभासिनः
प्रदीप्तभालस्य न्यवेदयन् क्रमात्।।

( 36 )

ज्ञानाम्बुराशे! तपसांनिधे! प्रभो!
भवन्मुखाम्भोजविनिःसृतं मधु।
मनोविकारप्रशमौषधं परं
प्रपातुकामः सुरबालको मुने!।।

( 37 )

संसारवारान्निधिनाविकस्य
समस्तलोकैकहितप्रदायिनः।
नमन्नयं पादसरोजयुग्मकं
तवोपदेशं मनुजोऽपि याचते।।

( 38 )

कुवासनाजालनिबद्धमानसे
न शान्तिरस्ति स्थिरताऽपि न क्षणम्।
चलत्तरङ्गे जलधौ निपातितो
निमज्जनोन्मज्जनलुप्तचेतनः।।

( 39 )

तमोऽन्धदृष्टिः पतितः पदे पदे
तवोपदेशाञ्जनमेष याचते।
प्रकाशतां येन जगद्यथार्थत
स्त्वयाऽसुरायाद्य गुरो! प्रदीयताम्।।

( 40 )

करावलम्बः करुणाम्बुराशे!
प्रदेलिमोऽस्मै सदयेन चेतसा।
सुखावहं भद्रतमं गुरोः पदम्
समस्तदुःखौषधमुच्यते बुधैः।।

( 41 )

इत्यभिलषितं तेषां
निशम्य शास्ता स चादिशद्धीमान्।
व्रतमाचरन्तु वर्षं
तपःपरं ब्रह्मचारिणः सन्तः।।

( 42 )

तपसा विमलमनोभिः
शासनपात्रत्वमाप्यते नितराम्।
सुसंस्कृतायां भूमा-
वुप्तं बींज प्ररोहमागच्छेत्।।

( 43 )

तपोरता निवसन्तः
सुपावने ते तदाश्रमे शान्ते।
निर्मलमनसोऽभूवन्
तन्महिमानं विचिन्तयामासुः।।

( 44 )

इमे भोगा नूनं परमरमणीया अपि परं
तपः सिद्धेरेते करतलगता यस्य नियतम्।
प्रजानाथो देवासुरमनुजसंसेव्यचरणो
ह्युदासीनञ्चास्ते प्रभवति मनः संयमवताम्।।

( 45 )

कुमारा भूपानामपि मृदुलदेहाः प्रतिदिनम्
गुरोराज्ञां मस्ते सविनयमथाधाय गहने।
निराहाराः सर्वं दिनमपि गवां चारणपरा
अनादिष्टाश्चैते फलमपि न गृह्णन्ति सुलभम्।।

( 46 )

इमा गावो नूनं बहुतरपयोदानकुशलाः
परञ्चैते स्तन्यं कथमपि न गृह्णन्ति तृषिताः।
व्रतादेशं धृत्वा गुरुवचसि निष्ठां निदधतः
तपः क्षीणास्तेजः समधिकमहो किन्तु दधते।।

( 47 )

बद्धासनं विमलबोधप्रशान्तचित्तं
ध्यायन्तमत्र मनसा पुरुषं महान्तम्।
उन्मील्य लोचनयुगं करुणाब्धिवीची
रेतं किरन्तमभितो गुरुमानता: स्म:।।

( 48 )

अस्यानुशासनमिवाप्य विनीतचित्ता:
व्याघ्रादयो नियममादधते निकामम्।
हिंसन्ति नैव हरिणानिह किन्तु प्रीत्या
सख्यं विधाय च मिथो निवसन्ति नित्यम्।।

( 49 )

वर्षं स्थिताश्च सुमनोमनुजासुरास्ते
तस्य प्रजापति–गुरोस्तपसा प्रशान्ते।
सिद्धाश्रमे किल दधु: स्वमनोऽनुकूलां
शिक्षां सुधां तदपुदेशगिरो विनैव।।

( 50 )

आसीनं सुमनोलतावृततरुच्छाये प्रशान्ताश्रमे
तेजोमण्डलमण्डितं गुरुवरं प्रज्ञासुधावर्षिणम्।
नत्वा बद्धकराञ्जलि: सविनयं प्राह स्म शिष्य: सुरो
दद्यान्मे कृपयोपदेशमधुना दत्तोऽवधि: पूरित:।।

( 51 )

इत्युक्त: स प्रजापति: श्रुतिविदां श्रेष्ठस्तपोदीप्तिमान्
'द' इत्यक्षरमुच्चचार स पुनस्तस्याशयं पृष्टवान्।
प्रत्याह स्म सुर: स साधु विदितं ह्येतद्रहस्यं मया
स्वच्छन्दं विचरन्तमिन्द्रियगणं दाम्येति प्रोक्तं त्वया।।

**( 52 )**

सत्यं वत्स! ममोपदेशवचनं ज्ञातं त्वया तत् पुनः
संधार्यं हृदयेन जीवनपथे पाथेयमित्युच्यते।
अश्वः साधनमस्ति दूरगमने भूत्वा वशे यात्रिणः
स्वच्छन्दं विहरन्नयञ्च सुतरामारोहिणं पातयेत्।।

**( 53 )**

अवसरमवलोक्य मानवोऽपि
प्रभुपदपद्मयुगार्पितान्तरात्मा।
अवददिति कुरुष्व दृष्टिपातं
ह्युपरि ममापि प्रशाधि मानवं माम्।।

**( 54 )**

तमपि समदृशा विलोकमानः
समवोचत्स तदक्षरं हि भूयः।
अवगतमिति वत्स! सोऽन्वपृच्छत्
मनुजः सोऽपि जगाद तत्त्वमाप्तः।।

**( 55 )**

कथयति भगवान् प्रदेहि कामं
न च किमपीह तवास्ति वस्तु नूनम्।
परिमितमुपभुङ्क्ष्व यावता वा
भवति वपुर्भरणञ्च ते जगत्याम्।।

**( 56 )**

निखिलगुरुरसौ प्रजापतिस्तद्
वचनमुदारमुरीचकार सत्यम्।
भवति शुभनिदानमत्र दानं
जयति च तद्बलमेत्य नाकलोकम्।।

( 57 )

अथासुरः सोऽपि जगाद सद्गुरुं
न दीनबन्धो! समुपेक्षणीयः।
अयं जनस्त्वां शरणं प्रपद्यते
वचोऽमृतं मेऽपि प्रदेलिमं गुरो!।।

( 58 )

कादम्बिनी वात्र कृपा गुरूणाम्
प्रवर्षति प्रेमरसं समानम्।
तृषातुरोऽयं तव पादमूल-
मुपागतो देव प्रदेहि दृष्टिम्।।

( 59 )

तदक्षरं सोऽथ समुच्चरन् पुन-
र्दयानिधिः प्रीतमना उपादिशत्।
अवेदि किं वत्स! ममाशयस्त्वया?
'दयस्व दीने' भवतेति शिक्षितम्।।

( 60 )

प्रजापतिस्तत्कथनं तथैव
समर्थयन् शान्तमना उवाच।
दयाबलेनैव समस्तमेतत्
प्रपञ्चजातं स्थिरतां प्रयाति।।

( 61 )

महर्षयो मुक्तसमस्तबन्धना
विराजमाना अपि मुक्तिमन्दिरे।
दयाद्रवीभूतहृदः कदापि
लोकोपकाराय वपुर्धरन्ति।।

**( 62 )**

जगर्ज मेघो दददेति तत्र
दमश्च दानञ्च दया च धेलिमा:।
त्रिरत्नमेतन्मनसाऽवधार्यताम्
प्रकाशते लोकपथश्च येन।।

**( 63 )**

दाम्यत दत्त दयध्वं
गर्जति गगने घनोऽपि गम्भीरम्।
कर्णौ प्रदत्तधीरा
निसर्गवाचो हृदाऽवधर्त्तव्या:।।

*इति श्रीरामजीठक्कुरप्रणीतमनुशासनं नाम खण्डकाव्यमवसितम्।।*

श्रीमन्नील-सरस्वत्युग्रतारैकजटाभ्यो नमः

## अथ प्रथमः सर्गः

# लीलाशुकीयं काव्यम्

( 1 )

भक्तसखो भगवानिह
        कुरुते लीलां प्रभुः स्वभक्तानाम्।
मनोविनोदनिमित्तं
        परन्तु शिक्षाऽपि लभ्यते मधुरा।।

( 2 )

अधिशिक्षामयलीलं
        प्रीतिसुधासिक्तमानसं भक्तम्।
पात्रीकुरुते सोऽयं
        साधनसम्पत् समन्वितं बहुधा।।

( 3 )

नेदीयो ननु! सदनं
        प्रीतिवशीभूतचेतसः सत्यम्।
श्रीकृष्णस्य कृपालो-
        र्मुक्ता भक्ता भजन्ति यं नित्यम्।।

( 4 )

प्रीति-सरित्प्रवहन्ती
        बलवद् वेगेन मानसे यस्य।

नयति प्रभोः पदकमलं
सुविमलमनसं विधाय सानन्दम्।।

( 5 )

परीक्षते स च बहुधा
गुरुः समेषां परन्त्वसौ पश्यन्।
उत्थापयति निपतितं
करावलम्बं प्रदाय सर्वात्मा।।

( 6 )

भक्तमनास्तद्वपुषा
स्वयमपि कुरुते सुधामयीं लीलाम्।
सर्वसुहृच्छ्रीकृष्णः
कथमिति भव्या गिरः कवेः श्रव्या।।

( 7 )

कावेरीचञ्चलवीचिसङ्गपावनपवने
दक्षिणापथे जनपदे प्रसिद्धे पुरातने
काले बभूव नरपतिः कोऽपि परिपूतमना
नयविनयसम्पदा युतो धार्मिकः कृती-
यशो विश्रुतः स्नेहसागरः सोऽपि सन्ततिहीनो
भगवतीभावनानिरतहृदा पुत्रीमवाप।।

( 8 )

गुणगणलसितामतिशयललिता-
मथकृपालेशतो जगदम्बायाः।
यया पूर्यते मनोरथः सकलोऽपि
सुधासंसिक्तदृशैव हि भक्तचेतसः।

भजतस्तामतिदीनभावतो न खलु धावतः
कनकहरिणहरणाय मुग्धमनसो ह्यनारतम्।।

( 9 )

मनसेव निर्मिता रूपराशिना
विश्वसृजा वा कुसुमकोमला
किसलयारुणाधरा मोहनी
लावण्यामृतसिन्धुनिर्गताः
नृपतिसुता सा।।

( 10 )

सुन्दरतासारं समस्तमपि समादाय सा
सम्बभूव भुवनैकसुन्दरी।
सितदलचन्द्रकलेव रूपरश्मिं विकिरन्ती
नयनवतामिह लीलयैव मानसं हरन्ती
नियतिवशीभूतेव पञ्चतामाप्तवती हा!।।

( 11 )

नृपतिसद्मसकलञ्च शोकसागरे निमग्नम्
वज्राहतमिव मनः समेषां तदा प्रमग्नम्।
सुमसममृदुला प्राणोपमपुत्रिका मदीया
विभूषिता यैरिह ललास सा श्रीरिव ललिता
भूषणैर्विना तैरधुना परलोकं गच्छतु
कथमेषा दीनेव धराऽस्यै सुखं प्रयच्छतु।।

( 12 )

इति भावयता नरपतिना पित्रा च भूषिता
भूगर्भे शायिता शोचता साश्रुलोचनम्।

न च देया दहनाय कुसुमकलिका कमनीया
तया विना हा! शोकशिखा कथमिव शमनीया।।

( 13 )

जिगमिषवः प्राणाश्च तया सममेव मामकाः
जागता न विषया अशान्तहृदि शान्तिधायकाः।
इत्यशान्तशोकाकुलस्य राज्ञो निजात्मजा
परलोकं गतवत्यपि चेतसि चिरं राजिता।।

( 14 )

यस्मिन् सत्यहमित्युदेति ममता प्रवर्धते
धियोद्भाविता श्रीरपि लसति वसति सम्मोहनशक्तिरद्भुता–
ऽऽकृतौ किन्तु प्रविलीयगते क्वचिदपि ननु तस्मिन्।।
वपुर्मृदा सममेव मन्यते!
का सुन्दरता! केन कश्च भूषितो जायताम्
लोचनतृप्तिकरी च कान्तिरुड्डीयते क्वचित्
एक एव पुरुषः स सुन्दरश्चेतनामयः
शाश्वतः परः सकलरूपराशिं विहाय
विहरति स्वच्छन्दम्।।

( 15 )

सर्वमिदं शोकाकुलेन पित्रा नरपतिना
न च निभालितं प्रभुमायावशमागतेन वा
न च समीक्षितुं प्राभूयत तमसाहृतमतिना
नियतिनीतहृदयेन तेन विपदाहतेन वा।।

( 16 )

संयोगादिव सर्वमिदं पश्यन्नासीदथ
युवा यतिस्तत्त्वं विचारयन् तत्र संस्थितः

लोकैषणावशीभूतो वित्तैषणाहत:
लुब्धमना चिन्तयति मनसि नृपसुताभूषणम्
जिघृक्षन्नथ शङ्कयाऽऽकुलो मृद्राशिं दूरीचकार
धनराशिलब्धये तस्य विवेकोऽप्यससार
सहसा न संशय:।।

( 17 )

संकल्पित: पुरैव तेन यज्ञ: सुविशाल:
पूर्णतामियादसौ येन निश्चितं सर्वत:।
तेन चिन्तितं मूढनृपतिना शवो भूषित:
धननिचयं भुवि वा निपात्य नूनं विदूषित:।।

( 18 )

क उपयोग: स्यादिहास्य मोहो विजृम्भते!
ग्रहीतव्यतामेति राजपुत्रीभूषासौ।
साधुमहासम्मेलनञ्च परिपूर्णमस्तु मे
इति मनसा भावयन्नसौ शुश्राव गभीरम्
वच: प्रस्फुटं शवगर्तादागतं भीत इव।
'मामिह लुब्धमते! त्वदीयतृष्णा भयङ्करी
महासुप्तिसंलीनचेतसं वृथा क्लेशयति।
नेयं भूषा पितु: स्नेहरस एष विद्यते
धनप्राप्तिसाधनं लुब्धबुद्धे! निगद्यते।

( 19 )

उच्यतां पिता मम पर्यङ्कशिरोदेशस्थितपादयोस्तले
भूतलस्थिता: कनकरत्नराशयो रक्षिता:
स च दास्यति सर्वं मयोक्त इति गम्यतामित:
व्यवधेयं मे शान्तिसुखं न च यते! प्रार्थये!

वसुना तेन तवोद्धवोऽपि सम्यक् समाप्यताम्
प्रभुणा ते निर्मलं यशः सत्त्वरं दाप्यताम्।।

( 20 )

इत्यशरीरिवचो निशम्य दण्डी राजानम्
समुपगम्य सर्वं जगाद लेभे वसुजातम्।
मुदितमनाः स च महामहं समपूरयत् सुखम्
नैके यतयः समागता द्रष्टुं महामखम्।।

( 21 )

तदुत्सवे सङ्गमोऽभवत् किल बहुलोकानाम्
वारणाय सर्वथा जागतिकभयशोकानाम्।
दिव्यमधुरप्रवचनमधूनि पायं पायं ते
जना आगता येऽत्र मुदितमनसो जायन्ते।
धार्मिकताया महासरित् प्रावहत् प्रकामम्
सारस्वतपुत्राः सुपूजितास्तत्र निकामम्।।

( 22 )

स्वादु भोजनं कृत्वा केचित् तर्पितहृदयाः
ब्रह्मविचाररसं निपीय साधवः सहृदयाः।
प्रसारयामासुर्यशोऽस्य यतिनः सुनिर्मलम्
आयोजको व्रती बभूव मुदितः स निर्भरम्।।

( 23 )

किन्त्ववसाने महस्यास्य निजमाधमर्ण्यमपि
विचारयन् स च यती चिन्तयाऽऽकुलोऽजायत
मुक्तिसाधनं किमपि नैव तस्यानुपश्यतः
कर्मबन्धनं सम्बभूव निपुणं निरस्यतः।

सहसा तच्चञ्चले मनसि चपलेव प्रास्फुरत्
भूगर्भे निक्षिप्तनृपसुता-भूषण-स्मृतिः।

कनकरत्ननिचयो न्यधायि यो भूतले मुधा
ऋणमुक्तिर्भविता च तेन विशदञ्च मे मनः
नादाने दोषोऽपि तस्य यो भूभुजोज्झितः
पुण्यराशिमादाय सफलतामेतु निर्धनः।।

**( 24 )**

इति कुतर्कजालावबद्धमानसस्तपस्वी
महागर्त्तमध्ये न्यपातयत् स्वमिह यशस्वी।
मध्येतामिस्रं चचाल मुदितः पाखण्डी
धर्म्यमनाविलकृत्यमिदं मन्वानो दण्डी।।

**( 25 )**

करे कुदालं दधद् दक्षिणे कक्षे दण्डम्
वामे शिरसि बबन्ध दृढं कृष्णं पटखण्डम्।

सूचिभेद्यतिमिरावृते स्थले विफलदृष्टिरपि
कनकमयं सर्वं व्यलोकयन्मनश्चक्षुषा
नृपतिसुता-शवगर्त्तभुवो मृद्राशिमुत्खनन्
शवावयव-सकलं भूषणमपि समुदतारयत्
उत्तरीयखण्डे निबध्य शवगर्त्त-पूरणम्
स च विधाय निजमाश्रमं प्रति प्रस्थितो यती।

गिरं पूर्वमिव चकितचेतसाऽश्रुणोदाकुलः
मूढमते! ननु चपलचित्त! कपटिन् संन्यासिन्
पातित्यं प्राप्स्यते भाविजन्मनि सुनिश्चितम्।।

**( 26 )**

निखिललोकनिन्दास्पदञ्च भवितासि कर्मतः
बहुनिवारितोऽप्यधोगमिष्यसि स्वयं धर्मतः।
श्रद्धाविरहितधर्मकाम! कुत्सितमते! यते!
ब्राह्मणत्वमपि विनिन्दितं भविता न संशयः।।

**( 27 )**

द्विजस्यापि ते वेश्यासक्तिर्नूनं भविता
सम्भविता ते दुर्यशोऽसितो जीवनसविता।
कीर्तिरागिता प्रबलतरा वैराग्यवतस्ते
विषय-विषमकानने धावतः सुखं कुतस्ते!।।

कुलिशोपममभिशापवचः श्रुत्वासौ दण्डी
जडीभूत इव समजायत सहसा पाखण्डी
बहिरिव तमोऽन्तरं व्यापत् प्रज्ञा विनिर्गता
क्षमाकृते कम्पितवपुषः प्रार्थना नागता
न चास्फुरत् किमपीह तस्य हतचेतनस्य वा
शिखरि-शिखरपतितस्य निराशाश्रितजनस्य हा!

**( 28 )**

किन्तु तदानीमेव निविडतिमिरेऽपि भास्वरम्
ज्योतिरिवालोकितं तत्र हृदयञ्च सत्वरम्
प्रकाशयद्वचनं सुधोपमं व्याप तच्छ्रुतिम्
'मा भैषी' रिति तन्निशम्य यतिरादधे धृतिम्।।

**( 29 )**

गुरु-गभीरगीरुद्बभूव नियतिर्बलीयसी
कर्मजालनिर्मिताऽथवा माया महीयसी।
विवशीकुरुते जनं किन्तु जाग्रत्पुरुषोऽयम्
प्रभुचरणावाश्रित्य कदाचिद् ध्यायति 'कोऽहम्'।।

( 30 )

तत्करुणामासाद्य तरति दुस्तरभवसिन्धुम्
श्रद्धाभक्तियुतेन हृदा लभते निजबन्धुम्।
कनकहरिणलोभाहतेन विपदेव लभ्यते
तद्योगादन्योऽपि जनस्तमसाऽभिभूयते।।

( 31 )

त्वत्पाणिस्पर्शादिवाहमपि लोकगर्हिता
वेश्या संभवितास्मि कलुषपुञ्जेन कल्पिता
लीलामिव नियतेर्निभाल्य सा पुनरुवाच तम्
दूरदृष्टिरिव नृपतिकन्यका यतिं चिन्तितम्।।

( 32 )

यते! समुत्थानस्य कृते पतनञ्च कदाचित्
भवति, रोदनं नाम नियतिगत्या च हासकृत्
अनुतापं कुर्वता ग्लानिरपि प्रभुपदकमले
समर्प्यते यदि कलुषराशिशमने शुभविमले।।

( 33 )

तत्करुणापूरेण पावितः कृपा-भाजनम्
ध्रुवं जायते समधिगम्य लोके सभाजनम्
स्वीकुरुते निश्छलं प्रेम निष्कारणबन्धुः
हरत्याधिमिह भजतो नूनं करुणासिन्धुः।।

( 34 )

तवोद्धरणमपि भावियते! चिन्ता विमुच्यताम्।
श्रद्दधता तत्पदे त्वया बहुनात्र शुच्यताम्
पथि स्खलन्नपि पदं कोऽपि यतमानो गच्छति
परमगुरुः सम्यक् परीक्ष्य सिद्धिं ननु यच्छति।।

**( 35 )**

विना श्रद्धया यशःकामिनस्तव स्पर्शतः
गणिकाकुले ममापि जन्म भवितेति दृश्यते
आवामुद्धारकावावयोः कर्त्तुमिच्छता
तेन कदाचित् कुतूहलादिव परामृश्यते।।

**( 36 )**

मेलिष्यावः पुनर्यते! नियतिर्न वार्यते
निखिलगुरो राज्ञाऽत्र नाम मालेव धार्यते।
आशु गम्यतामितो यते! शान्तिर्न भज्यताम्,
धर्मे रतिस्तवास्तु किन्तु वञ्चना त्यज्यताम्।।

**( 37 )**

इत्यभिधाय विराममाप सा गीरथ चित्ते
तस्य चिरं गुञ्जिताऽभवद् भग्ने गतवित्ते।
स च विखिन्नमनसा विचिन्तयन् स्वाश्रमं कथम्
प्राप तन्न बुबुधे विसंज्ञ इव तिक्तमना इव।
विसस्मार चिन्ता हताशहृदयश्च सर्वमपि
राजसुतावाचो रहस्यबहुरिक्तमना इव।
रहसि तिष्ठतस्तस्य मनसि नृपसुता–भारती
पुनः पुनर्ध्वनिता बभूव बोधं प्रकुर्वती।।

**( 38 )**

का घटना घटतेऽत्र पश्य ननु मुक्तचेतसा,
शुभमशुभं वा फलं भवतु चिन्ता विहीयताम्।
न हि विचारविषयस्तदस्ति किमु मुधा श्रम्यते
केवलमिह पथि पथिक! पदं निर्भयं धीयताम्।।

( 39 )

सुकृत-दुष्कृते कर्मणीह मनसा पदकमले
तस्य निर्मले समर्पयन्ननु मुक्तमना भव,
अहमितिभावो वहति दुर्वहं भारमत्र खलु
परित्यज्य तं हरिमाश्रयतः को भारस्तव।।

( 40 )

तृष्णा जनयति कर्मशुभं तदितरमपि वीरम्
भ्रमयति माया पटीयसी पण्डितं सुधीरम्।
नचान्तरं ज्योतिः प्रकाशते यावद्धृदये
तत्करुणाकादम्बिनी न वर्षति तवाशये।।

( 41 )

तावत्तदुपायः सुनिर्मलं प्रेम केवलम्
तत्पदकमले तदेवास्ति साधकमनोबलम्।
येन वासना-निशाचरी प्रबलं निरुध्यते
यत्र-तत्र सर्वत्र सदा प्रभुरेव बुध्यते।।

( 42 )

बहुविषयो लोभः परन्तु प्रीतिश्च निर्मला
एकमेव विषयं चिनोति नित्यञ्च निर्मला।
सर्वमयः प्रभुरस्ति, किमपि रूपं निजेच्छया
मनसि धीयतामत्र सर्वथा शुद्धया धिया।।

( 44 )

न खलु धावता किमपि वस्तु लभ्यते जन्तुना
सदा तिष्ठ चैकत्र पदे किं श्रम्यतेऽधुना।
इत्यादिकमर्थं विभावयन् यती दुःखितः
वपुरेतत् सन्त्यज्य परं लोकं च प्रस्थितः।।

**( 45 )**

पतितेऽपि तरौ न जीवनं भुवि संलीय विलीयते क्वचित्।
निजबीजचयं विनिक्षिपन् तरुरायाति पुनर्न संशयः।।

**( 46 )**

प्रभुशक्तिरियं दुरत्यया भ्रमयन्ती पुरुषं निजेच्छया।
पदपद्ममुपेत्य निर्भयं ननु तस्यैव निरस्यते ध्रुवम्।।

*इति रामजीठक्कुरकृते लीलाशुकीये काव्ये*
*प्रथमः सर्गः समवसितः।*

# अथ द्वितीयः सर्गः

( 1 )

दाक्षिणात्य-भारते कृष्णवेण्वासरित्तटे
नारिकेल-पूगी-रसालतरुराजि-राजिते
ग्रामरत्न एकत्र नाम कुलशीलविश्रुते
विप्रवंश उदभवद् भक्तकुलमणिर्मङ्गलः।।

( 2 )

विद्यया विमलकर्मणा श्रुतः
शिष्यवृन्दबहुसम्पदा लसन्।
इष्टिकृन्निपुणदृष्टिधारकः
तत्पिताऽपि यशसा सुशोभितः।।

( 3 )

दामोदरनामाऽभूद् भक्त्या वैदुष्यभासितः सुतराम्।
'नीवी' नाम सुजानी सती सुशीला सुवत्सला चासीत्।।

( 4 )

खैस्तवर्षमितहर्षवर्षके
वर्ष उद्भवन् प्रेमविग्रहः।
कृष्णभक्तिमधुधारया भुवं
तापितामकृत शीतलाञ्च सः।।

( 5 )

पूर्वजन्मप्रतिभानदीपितः
क्रोडमेत्य पितुरेष बालकः।
श्रीशभक्तिरसपूरपूरितं
शिक्षतेस्म मधुकाव्यसञ्चयम्।।

( 6 )

गायतिस्म मुदितेन चेतसा
साकमेष जनकेन सुस्वरम्।
श्रीपतिप्रथितभावसुन्दरं
तीव्रमुल्लसन् बिल्वमङ्गलः।।

( 7 )

पञ्चमे वयसि वेदसम्मतं
यज्ञसूत्रधरणव्रतं पिता।
कारयन् प्रखरतेजसा तनुं
तस्य दीप्तिभरदीपिता व्यधात्।।

( 8 )

साङ्गवेदमधिगत्य निष्ठया
दर्शनानि विविधानि चिन्तयन्।
भक्तिकाव्यनिचयानुशीलनाद्
दिव्यभावमधुराशयो बभौ।।

( 9 )

गायतो मधुरभावसम्भृतं
श्रीमुकुन्दगुणगौरवान्वितम्।
काव्यमाशु नयनारविन्दत-
स्तस्य प्रावहन्नीरमुज्ज्वलम्।।

( 10 )

वैदुषी विमलकीर्त्तिराजिता,
रूपमस्य तरुणीमनोहरम्।
शीलसम्पदपि चित्त रारिका
चन्द्रिकेव लसतिस्म निर्भरम्।।

( 11 )

रूपशीलगुणसम्पदन्विता
पर्यणायि सुकुलीनकन्यका।
तेन विप्रतनयेन सत्तिथौ
'मङ्गलेन' शुभलग्नके मुदा।।

( 12 )

सा न किन्तु मुदमादधे हृदि
प्रीतिपूर्णहृदयापि सुन्दरी।
तस्य दैवकृतदुर्विलासत-
स्तृष्यतश्च पीयूषसन्निधौ।।

( 13 )

सेवतेस्म शुचिचेतसा प्रियं
सा तथापि पतिदेवता शुभा।
कोमला च तदुपेक्षयाऽऽहता
विव्यथे मनसि किन्तु तत्परा।।

( 14 )

योषिदत्र विधिनैव निर्मिता
सेवितुञ्च करुणामयी ध्रुवम्।
मानमादरं प्राप्नुयान्न वा
सा परन्तु बहुपुण्यशालिनी।।

( 15 )

सा परस्वमिव तातपालिता
दीयते सविधि नाकहेतवे।
सा ग्रहीतृपुरुषस्य भूषणम्
रक्ष्यतेऽधिनिधि रोचते च यदि।।

( 16 )

सरितस्तटे समृद्धं कलाविलसितं पुरं प्रतीचीने।
आसीत् प्रसिद्धमेकं स्वरिव सुललितञ्च कृष्णवेनायाः।।

( 17 )

सा च सरित् सुगभीरा
सुविशाला वीचिचञ्चलाऽत्यर्थम्।
तटतरुराजिसुरम्या
सदैव नम्या मुरारिभक्तानाम्।।

( 18 )

श्रीहरिमन्दिरमतुलं
रोधसि तस्या अवस्थितञ्चासीत्।
वातेरितया भक्तान्
शिखरध्वजया समाह्वयल्लोकान्।।

( 19 )

अथ मङ्गलः कदाचित्
पारेनदि कृष्णदर्शनं कर्त्तुम्।
तत्रागमद् दिनान्ते
नगरभ्रमणं समुत्सुको व्यदधात्।।

( 20 )

भ्रमतस्तस्य सुगीत–
ध्वनिरायातः श्रुतौ सुधाकल्पः।
स्तब्ध इवासौ सहसा
तस्थौ तत्रैव माधुरीकृष्टः।।

( 21 )

नियतिवशीकृतचेता
विशालभवनं सुसज्जितं प्रविशन्।
सोऽपश्यन्नृत्यन्तीं
वारवधूटीं मनोरमामेकाम्।।

( 22 )

सुलोचनसुधामिव प्रबलवेगरागञ्च तां
मनोनभसि कुर्वतीं विमलचन्द्रिकारोचिषम्।
निरीक्ष्य हतमानसः स च बभूव तस्मिन् क्षणे
सदैव हरिमायया भ्रमति नाम मूढो जनः।।

( 23 )

तदीयबहुवर्चसा स च युवापि रूपश्रिया
लसन् मनसि मेनकोपमरुचश्च तस्या हठाद्
विवेश रति–तत्पती चिरवियोगदुःखाकुलौ
मिथो मिमिलतुस्तदा सुख–सुधावगाहोत्सुकौ।।

( 24 )

गता दिवमदीयसी ननु पुरैव माताऽऽतुरम्
रुजा च जनकं वधूः कथमसौ च संसेवते।
उदैन्न शुभभावना द्विजवरस्य विद्यावतः
प्रियारतिहतात्मनो जयति कामदेवो नृपः।।

( 25 )

करोति नहि कं वशे पुररिपोर्न भग्नं मनः?
न तापयति योगिनं मुनिमयं न मोहाकुलम्।
विधाय तनुमध्यमानयनकोणबाणाहतं
निपातयति भूतले शिखरितुङ्गशृङ्गस्थितम्।।

( 26 )

इयञ्च सुतनुः प्रिया बहुगुणैः स्वरूपश्रिया
यथार्थमभिधीयते युवजनेन चिन्तामणिः।
स्वयं रतिरुपागता भुवमिमां विजेतुं किमु
त्वनङ्गसुमसायकैः सुमधुरैः पिकानां रवैः।।

( 27 )

प्रगाढशुचि प्रेम यद् भवतु भौतिकं वा पुनः
सुयोजयति तन्मिथः प्रभुपदेन दिव्यं भवत्।
निरुद्धमिह प्रेमिणौ, प्रभुरयं हि प्रेमाम्बुधिः
सरित् प्रखरधारया मिलति नाम सिन्धुप्रियम्।।

( 28 )

तयोर्युगलमद्भुतं मधुरप्रीतिमूर्त्तिं दधत्
सदैव किल सङ्गतं विरहभावि दुःखं स्मरत्।
विषण्णमिव जायते पिबदपूर्वरूपासवं
सुमत्तमिव विस्मरत् सकल-लोककृत्यं पुनः।।

( 29 )

दृशा पिबति माधुरीं प्रियतमासुरूपश्रियः
गिराऽपि गुणगौरवं गदति प्रीतचित्तो युवा।
प्रियासुवचनामृतं हृदि मुदा तदास्वादय-
न्नसौ सुभगमङ्गलः सुलयमाप चिन्तामणौ।।

( 30 )

असावपि सुलोचना समनुरक्तचित्ता प्रिये
सुरूपगुणशालिनि प्रथितप्रीतिसिन्धौ तदा।
जहौ स्वजनजीविकां ललितनृत्यगानात्मिकां
जगाम न च कुत्रचिद्धनवतां महत्युत्सवे।।

( 31 )

सदैव प्रभवे परं विमलप्रेम सुप्रीयते,
परीक्षितुमयं पुनः प्रकुरुते स्वलीलामहो!
तदत्र स च माधवः कपटतः प्रसिद्धो नृपो
भवन्नकृत नारदं कृतकमन्त्रिणं कौतुकात्।।

( 32 )

अदादथ निमन्त्रणं बहुधनैश्च तस्याः पुन-
र्न सा च परिलोभिता विचलिता स्वकीयव्रतात्।
ययौ न खलु तत्सभां स्वकलया समाराधितुम्
नृपं, परमसौ प्रभुः परमतोषमापेदिवान्।।

( 33 )

धिया विमलयाऽप्ययं हृदि प्रकाशमासादयन्
कदापि बहुपुण्यतो मिलति नाम संख्यावतः।
प्रभुः परमदुर्लभो मधुरभक्तियोगात्पुनः
प्रभूतकरुणामयः सुलभ एव भक्ताशये।।

( 34 )

क्वचिद्यदि निबध्यते मन इदं न चान्यत् परं
विचिन्तयति रागतस्तदिह प्रेम नामोच्यते।
कदापि यदि तत्पुनः प्रतिहतं परावर्त्तते
तदा प्रभुसमीहया वहति प्रेमसिन्धौ ध्रुवम्।।

**( 35 )**

इतीव हृदि भावयन् प्रभुरपूर्वलीलापटुः
परीक्ष्य निदधे हृदि प्रबलप्रीतिसारावहम्।
तयोर्युगलमुज्ज्वलं किमपि कर्त्तुमिच्छन्नसौ
चकार किमु तत् पुनः कविगिरैव संश्रूयताम्।।

*इति रामजीठक्कुरकृते लीलाशुकीये काव्ये*
*द्वितीयः सर्गः समाप्तः।।*

# अथ तृतीयः सर्गः

( 1 )

तनुजकृतमवद्यं चिन्तयन् कर्मखिन्नो
मनसि बाहुनिराशो हन्त! दामोदरोऽसौ।
बहुतरचिररोगग्रस्तजीर्णं वपुः स्वं
जगति विरतचेता अत्यजन्मन्दभाग्यः।।

( 2 )

गतवति परलोकं निःसहाया सती सा
पितरि परमखिन्ना दीन-दीना विषण्णा।
जनकहितमतं तत्प्रेतकृत्यं विधातुम्
पतिमभि पटुभृत्यं प्रैषिषत् सन्दिशन्ती।।

( 3 )

सकरुणदलमेकं साऽलिखत् स्वामि-दासी,
सखि! तव पदपद्मं याचते स्वामिनं मे।
श्रुति-मत सुविधानं श्राद्धकृत्यं प्रशस्तम्
नयतु परमविज्ञः पूर्णतामत्र साधु।।

( 4 )

उचितमुपदिशन्त्या प्रीतया प्रेषितोऽसौ
प्रियतरनिजसख्या वा नियत्या नियुक्तः।
कथमपि गृहमापत् तातकृत्यं विधातुम्
झटिति तदवसाने कातरः सम्प्रयातः।।

( 5 )

मदनशरसुविद्धश्चिन्तयन् प्रेयसीन्ताम्
क्षणमपि निजपत्नीं नामिलल्लीनचेता:।
जनकगुणमुदारं स्नेहसारं कृतघ्नः
स्मरणपथमनैषीज्जातु नासौ विमूढः।।

( 6 )

अधितटमुपयातः कृष्णवेण्वातटिन्या-
स्तरणमथ तदीयं दुष्करं भावयित्वा।
विरहमपि च तस्या अक्षमः सोढुमेष
त्वरितमनुपपात प्रोच्छलन् तीव्रवेगे।।

( 7 )

ललितमधुररूपं चिन्तयन् स्वप्रियायाः
सुखदमति च तस्या नाम वाचोच्चरन् सः।
तरलतरतरङ्गेऽपीपतत् स्वीयकायं
गणयति नहि मृत्युं प्रीतियोगः कदापि।।

( 8 )

सा चिन्तामणिरुक्ता
प्रभुरपि चिन्तामणिः स्वभक्तानाम्।
अभिदधतो निजसंज्ञां
तारणहेतोः समुद्यतो भगवान्।।

( 9 )

अधिरजनि गते सा तामनापृच्छ्य पत्यौ
विपदमनुभवन्ती तस्य भीतान्तरात्मा।
विफलमिव स्वकीयं जीवितं मन्यमाना
सपदि किमपि कर्त्तुं निश्चयं हन्त! चक्रे।।

( 10 )

निबिडतिमिररात्रौ घोरघोषे पयोदे
सरिति चपलधारा भीषणायां कथं सः।
तरतु तरलचित्तश्चिन्तया दीन-दीना
तरलतरतरङ्गेऽपातयत्साऽपि देहम्।।

( 11 )

तनुरथ विफला मे सम्बलं तस्य भूयात्
अधिनदि तरणार्थं नौरिवास्तु प्रमुग्धा।
इति मनसि सती सा चिन्तयन्ती स्वकायं
प्रखररयलहर्य्यां पातयामास तन्वी।।

( 12 )

जगति विमलप्रीतिः कांक्षते नैव किञ्चित्
निखिलमपि निजस्वं निस्पृहं चात्र दत्ते।
इति खलु शुभशिक्षां लम्भयन्तीव लोकान्
स्वप्रियहितविधाने जीवनं चोत्ससर्ज।।

( 13 )

प्रणयिनमपि यत्नाद् भूयसो भिक्षमाणा
सुभग! परमधन्यां प्रेयसीन्ते कथञ्चित्।
तव सदनमनैषं त्वामिति प्रापणीयः
सकुशलमथ तस्यास्त्वं निकेतं मयैव।।

( 14 )

चपलपयसि कायं हन्त! तस्यास्तरन्तं
मदनदलितदृष्टिर्नावमाशानुकूलाम्।
प्रमुदित इव मत्वा प्रेषितां वै तयाऽसौ
प्रबलतरप्रयत्नादग्रहीद्दैवयोगात्।।

( 15 )

करधृतमृतकायः प्रोच्छलद्भिस्तरङ्गैः
सहकृत इव प्रापत् सद्म रम्यं प्रियायाः।
पिहितदृढकपाटं वीक्ष्य कामातुरोऽसौ
झटिति दृशमुपेता रज्जुरेका च दीर्घा।।

( 16 )

अहिरिह हतदृष्टे रज्जुराभाति नूनम्
दिनकरखररश्मौ नीरमालोक्यते वा।
उरगमपि स रज्जुं कल्पमानो दधानो-
ह्युपरि जिगिमिषुः सन् हन्त नीचैः पपात।।

( 17 )

समलजलप्रणाल्यां तस्य जाते निपाते
ध्वनिरधिकतरोऽभूत् स्वप्नभङ्गः प्रियायाः।
त्वरितमथ विबुद्धा गेहदासीमपृच्छत्
कथमिति ननु नादस्तत्र चिन्तामणिः सा।।

( 18 )

त्वरितमवतरन्ती सा च दासीसहाया
भवननिकटनाल्यां कर्दमेनानुलिप्तम्।
पतितमतिविरूपं विप्रमेतं विदित्वा
समजनि बहुखिन्ना भिद्यमानेव सद्यः।।

( 19 )

सपदि मनसि किञ्चिज्ज्योतिराभात्तदीये
विरतिरपि जगत्यामाशु तस्या बभूव।
कुटिलमदनलीलां भावयन्ती हताशा
घनतमसि निलीना साऽभवन्मीलिताक्षी।।

( 20 )

द्विजतनयमुदारं शास्त्रसारं विदन्तं
प्रथितमपि समाजे पण्डितानां कुलीनम्।
मदनशरनिपातात् कर्दमालिप्तकायं
पतितमिह प्रणाल्यां वीक्ष्य चिन्तापराऽभूत्।।

( 21 )

अधिवसतिनिकामं प्राणिचित्तं सकामः
जयति जगति जेता विश्वनेता प्रसिद्धः।
यतिनमपि तपोभिर्धूतकालुष्यपुञ्जम्
स्थितमपि सुसमाधौ व्याकुलीकर्त्तुमीष्टे।।

( 22 )

अमृतमिव सुखं यल्लभ्यमानं विभाति
मननसरणिमाप्तं, हन्त! हालाहलं तत्
प्रकटपटुरयं वा सुन्दरो बोभवीतु
परिणतिविरसेऽस्मिन् का रुचिः स्याद् बुधानाम्।।

( 23 )

भुवनविपिनमध्ये भ्रामयन् विज्ञलोकान्
सरल-तरलचित्तं मोहयन् वञ्चकोऽयम्।
सुकृत-वसु-विमुक्तिद्वारमावृत्य तिष्ठन्
न खलु बहिरपेयाद् गूढशत्रुः सुखेन।।

( 24 )

सकलहृदयभावो नार्पणीयः परस्मै
वसति मनसि गेहे कोऽपि लीलापटुर्मे।
भवतु पतितचेताः सुन्दरः पण्डितो वा
स्पृशति नहि मदीयं मानसं रम्यताऽस्य।।

( 25 )

जनकमपि रुजाऽयं पीडितं निःसहायं
बहुवयसमुदारं मृत्युनालिङ्ग्यमानम्।
विनय-मधुर-शीलां धैर्यदाक्षिण्यभूषां
हतमतिरनुकूलामत्यजद्धर्मपत्नीम्।।

( 26 )

स्वपतिमपि सुशीला याचमानाऽतिदीनं
नयनसलिल-सिक्तं पत्रमार्त्ताऽलिखद्यत्।
तपति करुणयामे चित्तमेतत् स्मरन्त्याः
सरलसुभगमूर्त्तिः किं विदध्यादिदानीम्।।

( 27 )

कलयति शुभबुद्धिः काम-प्रीत्योर्विवेकम्
सकलमपि च दत्ते लिप्सते नैव किञ्चित्।
निखिलभुवनवन्द्या कल्पवल्लीव तन्वी
कलुषमदप्रमाद्यचेतसा तेन मुक्ता।।

( 28 )

मम हृदयमिदानीं लब्धशिक्षं ततः किम्
श्रयति पदसरोजं राधिकाराधितस्य।
करकलितविपञ्ची मुक्तचिन्तं जगत्या-
महमिह मधुलीलां तस्य गास्यामि नित्यम्।।

( 29 )

स्नातं निर्मलपयसा
मङ्गलमेतं कुवासनापतितम्।
गुरुरिव प्रबोधयन्ती
विरागकलितेव साऽवदत् सुमुखी।।

( 30 )

प्रीतिर्याऽस्ति विनश्वरे वपुषि ते सा चेत् प्रभौ शाश्वते
सत्यानन्दसुधासमुद्रलहरीस्नातस्य शान्तिर्भवेत्।
मार्त्तण्डप्रखरातपे किमु तृषा ताम्यन् पयोविभ्रमात्
व्यर्थं धावसि मूढ! किं तव धिया शास्त्राब्धिनिष्णातया।।

( 31 )

तृष्णादग्धमतिर्विवेकविधुरो मोहान्धदृग् वा भवान्
स्वेच्छाचारवशंवदोऽभिलषितं कुर्यान्न वा मे वचः।
श्रीमन्नीलसरोजकोमलरुचः कृष्णस्य लीलासुधा-
सिन्धौ मे हृदयं निमज्जतु परं हित्वा विषं जागतम्।।

( 32 )

गोविन्दस्य पदारविन्दयुगले रक्ता विरक्ता भवे
तत्प्रीतिस्नपितेव मङ्गलमिमं मत्वा महाऽमङ्गलम्।
त्यक्त्वा जागतवैभवञ्च निखिलं मुक्त्वा सुखेऽपि स्पृहाम्।
पीत्वा तत्पदपङ्कजासवमसौ चिन्तामणिर्निर्गता।।

( 33 )

लीलागानमना अनारतमसौ प्रेमातिरेकोन्मदा
ध्यायन्ती मधुसूदनस्य चरणाम्भोजे निराशाभवे।
गायन्ती मनसाऽस्फुटं किमपि तद्गीतं सुधासोदरम्
निर्यान्ती भवनान्न दृष्टिसरणिं कस्यापि याता शुभा।।

*इति रामजीठक्कुरप्रणीते लीलाशुकीये काव्ये*
*तृतीयः सर्गोऽवसितः।*

# अथ चतुर्थः सर्गः

( 1 )

चिन्तामणिकटुवाचा
विवेकदीपः प्रदीपितस्तस्य।
ग्लानिभरेण नयनजल-
धाराः प्रवहन्ति सीदतो नितराम्।।

( 2 )

हृदयं निर्मलमभव-
ल्लोचनसलिलैः पतद्भिरत्यर्थम्।
मुक्तेर्नभसि पयोदैः
पवनक्षिप्तैः प्रकाशते चन्द्रः।।

( 3 )

चिन्तामणिमथ नत्वा
गुरुमिव भक्त्या स मङ्गलः प्रातः।
सोमगिरिं संन्यासिन
मुपागमद्दीनचेतसानितराम्।।

( 4 )

अश्रावयत् स्वकृत्यं
सर्वमवद्यं विहाय सङ्कोचम्।
दीनोऽयाचत दीक्षा-
भिक्षां कारुण्यसागरं यतिनम्।।

( 5 )

दीक्षा–संस्कृतहृदयं
भजतां भक्तिप्रसाधनं सुतराम्।
घृष्टं हीरकरत्नं
कान्तिमुपेतं प्रशस्यते नूनम्।।

( 6 )

हायनमिह गुरुचरणौ
सुसेवमानः प्रकर्षमापन्नः
हरिगुणगाने प्राक्तन–
प्रतिभासङ्गात् स मङ्गलः कामम्।।

( 7 )

द्विभुजं मुरलीहस्तं
मन्दस्मित्या सुधां प्रवर्षन्तम्।
ध्यायन् राधारमणं
कालमनैषीत् समाहितो भक्तः।।

( 8 )

प्रभुपदपद्मदिदृक्षा–
व्याकुलचेताः स मङ्गलः सततम्।
कुरुते स्पृहां विखिन्नः
पातुं तद्रूपमाधुरीं तृषितः।।

( 9 )

नन्दाङ्गने चलन्तं
नीरदनीलं कचैर्लसद्वदनम्।
स्मिताधरञ्च यशोदां
विलोकयन्तं स्मरत्यसौ कृष्णम्।।

( 10 )

गोभिर्गोपैर्विपिनं
सवेणुनादं विशन्तमाराध्यम्।
द्रक्ष्याम्यहं कदा तं
चिन्तातत्येति दूयते नितराम्।

दामोदरं जनन्या
मनसि प्रमोदं दृशैव कुर्वन्तम्।
कर्षन्तं भवतापं
विलोकयिष्ये कदा न जानेऽहम्।।

( 11 )

नन्दमनः सुखकन्दं
मन्दस्मित्या मुदावहं भजताम्।
गोपीगणपरिलसितं
बर्हापीडं स्मरन् जगौ गीतिम्।।

अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं
वस्तुप्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम्।
स्रस्त-स्रस्तनिबद्धनीविविलसद्गोपीसहस्रावृतं
हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृति।।[1]

वैयासकिशुककल्पं
श्रीहरिलीलासुगाननिष्णातम्।
सोमगिरिर्गुरुरेतं
'लीलाशुक' इति जगाद सुप्रीतः।।

1. कृष्णकर्णामृतम्, श्लो. 2

( 12 )

सहते कृष्णो भजतां
निजपदकमलं स्थितिं न चान्यत्र।
वृन्दावनं विनाऽयं
रीतिरियं नैव हीयते प्रभुणा।।

( 13 )

वृन्दावनमधिवसता
नित्यं हरिणा स्वभक्तविश्लेषात्।
व्याकुलमनसा भक्तो
ह्यनन्यशरणश्च नीयते शरणम्।।

( 14 )

वृन्दावनसुषमा सा
मनसि कदाचित् प्रकाशिता सहसा।
लीलाशुकस्य मधुरा
चन्द्रद्युतिरिव तमो निरस्यन्ती।।

( 15 )

तन्मधुरश्रुतिगीत्या
गृहीतहृदयोऽपि तद्गुरुः सदयम्।
प्रेरित इव प्रभुशक्त्या
शिष्यं भक्तं समादिशद् गन्तुम्।।

( 16 )

वृन्दावनं पवित्रं
प्रभुपदरजसा सुकीर्त्तितं बहुधा।
अधुनापि प्रभुरस्यां
भूमौ मधुराः करोति ता लीलाः।।

( 17 )

अधुनाऽप्यत्र सुमधुरं
गीतं गायन्ति पक्षिणो नित्यम्।
दामोदर! गुणसुन्दर!
गोविन्द! त्वं गतः कथं दूरम्।।
साम्प्रतमपीह पवनः
राधारमणस्य सौरभं दिव्यम्।
वहन् प्रयच्छति भजताम्
किमपि सुखं यन्न शक्यते वक्तुम्।।

( 18 )

स्वर्गशकलमिव भूमिः
भजतामानन्दकन्दली रुचिरा।
मधुराऽतीव सुमृदुला
सुखयति हृदयं नवेव सा नित्यम्।।

वृन्दावनगुणगानं
प्रकुर्वतस्तस्य गच्छतः सायम्।
पथि सरसीरुहलसितः
सरोवरो दृष्टिमागतः सहसा।।

( 19 )

सुमनःसम्पल्लसितै-
श्छाया-विश्रान्तिदायकैस्तरुभिः।
परितो वृतो मुरारे-
र्मन्दिरसौभाग्यशोभिनतोद्देशः।।

**( 20 )**

हरिभजनोचितदेशं
    रहसि मुरारेः सुमङ्गलां मूर्त्तिम्।
लीलाशुकोऽवलोक्य
    स्थातुं तत्रैव निश्चयं चक्रे।।

**( 21 )**

कविभक्तो नवमधुरा–
    रचनाः कुर्वन् मधुस्वरेणासौ।
श्रावयतिस्म मुकुन्दं
    मन्दिरमध्ये प्रतिष्ठितं भक्त्या।।

**( 22 )**

विचित्रवर्णाभरणाभिरामेऽ!
    भिधेहि वक्त्राम्बुजराजहंसि!।
सदा मदीये रसनेऽग्ररङ्गे
    गोविन्द दामोदर माधवेति।।

**( 23 )**

मन्दारमूले वदनाभिरामं
    बिम्बाधरे पूरितवेणुनादम्।
गो–गोप–गोपीजनमध्यसंस्थं
    गोविन्द दामोदर माधवेति।।[1]

**( 24 )**

ध्यायन् राधारमणं
    दिव्यगुणान् तस्य सुस्वरं गायन्।
महतीं प्राप प्रतिष्ठां
    श्रद्धापात्रं बभूव लोकानाम्।।

1. गोविन्द दामोदरस्तोत्रम्, श्लो. 2

( 25 )

सायं प्रातर्ललना
द्रष्टुं श्रीकृष्णविग्रहं भव्यम्।
प्रत्यहमत्र समेता
निवेदयन्ति स्म साधवे भोज्यम्।।

( 26 )

प्रमदा नमन्ति नित्यं
दधि नवनीतं पयः फलं मधुरम्।
तस्मै प्रदाय सादर-
मभिमन्यन्ते सुपूण्यबहुयोगात्।।

( 27 )

जनादरं लभमानो
धार्मिकताया गुरुदधद्गर्वम्।
धर्मधुरन्धर-धीरं
भगवद्भक्तं प्रसिद्धमात्मानम्।।

( 28 )

जानन् मोहितचित्तो
ह्यखर्वगर्वः पपात प्रभुभजनात्।
उत्थापयन् शिरं स्वं
प्रोन्मीलयते स्म लोचने कामः।।

( 29 )

काचन ग्रामवधूटी
सरसि स्नातुं समागता सायम्।
तस्यां दृष्टिर्न्यपत-
त्तस्य तदानीं स चाकुलीभूतः।।

( 30 )

सरसस्तटेऽपि तिष्ठन्
रूपवतीरूपमाधुरीं रुचिराम्।
लोचनभाजनपतितां
पिबति च मनसा भवन्नसौ दूरे।।

( 31 )

तद्रूपाहृतहृदयः
प्रभुपदभक्तिं स मङ्गलोऽगणयन्।
प्रमदासक्तमनाः खलु
प्रमादहेतोर्निपातितः सहसा।।

( 32 )

सा च समीपवसत्याः
साध्वी भार्या बभूव कस्यापि।
मदनाहतमनुयान्तं
यतिनं दृष्ट्वा ह्यतीव चकिताऽभूत्।।

( 33 )

स्वद्वारं सम्प्राप्तं
विलोक्य साधुं प्रियेण कथिता सा।
भिक्षामस्मै दत्त्वा
गमयसि कस्मान्न सादरञ्चैतम्।।

( 34 )

तदाशयं विहसन्ती
विशदमकार्षीत् प्रियस्य दयिता सा।
सोऽपि तदिच्छापूर्त्तौ
प्रभोः समीहां विभाव्य सन्नद्धः।।

( 35 )

जाया-पती सहृदयौ
हरिपदरक्तौ बभूवतुः सुतराम्।
भक्तपरीक्षां मत्वा
स्वागतमस्य प्रचक्रतुः कामम्।।

( 36 )

पतिरादिशत् सतीमपि
प्रमोदयैतं महातिथिं भक्तम्।
मायापतिमाराधय
राधाभावेन मुच्यताञ्चिन्ता।।

( 37 )

बहुरूपो नहि जाने
केन च रूपेण दर्शनं दद्यात्।
करुणाकरो मुकुन्दः
किं कामयते स एव जानीयात्।।

( 38 )

पङ्कङ्गतमपि भक्तं
करमिव धृत्वा समुद्धरेन्नूनम्।
दामोदरो दयालुः
प्रपन्नमनसं जहाति नैवेह।।

( 39 )

प्रसाधितां निशि पश्यन्
रूपवतीं तां समागतां सविधे।
ग्लानिभराहतहृदयः
स मङ्गलोऽभूद्विवेकजागरणात्।।

( 40 )

देवीं ददर्श तस्यां
प्रकाशरूपां सरस्वतीं महतीम्।
क्वणयन्तीमिव वीणां
कामपि कर्णे च माधुरीं ददतीम्।।

( 41 )

अभयं करे दधानां
विवेकदीपप्रभोज्ज्वलां परितः।
मन्दस्मित्या सकलं
कलुषं मनसोऽपसारयन्तीन्ताम्।।

( 42 )

सविनयमसौ ययाचे
चायसशूलद्वयं सुतीक्ष्णाग्रम्।
लब्ध्वा तत् किल तस्याः
सहसाऽविध्यत् स्वकीयनयने ते।।

( 43 )

ये नर्त्तयतो नित्यं
जगति सुरूपेण बध्नती पुरुषम्।
शिखराद् भुवि पातयतो
धावयतः खलु खरातपे सततम्।।

( 44 )

शोणितधारास्नातः
पीडां पीत्वा प्रणम्य तां देवीम्।
वृन्दावनमभिचलितो
नयनसरोजे समर्पयन् हरये।।

( 45 )

प्रवहन्तीं नयनाभ्यां
शोणितधारां विलोक्य भीता सा।
असूचयत् सत्वरमिति
प्रियं स्वकीयं न कारणं ज्ञात्वा।।

( 46 )

तत्पतिरेत्य चरणयोः
पपात तस्यातिथेः समाकुलितः।
कोऽभूदिहापराधो
वद मम साधो न जानतः सत्यम्।।

( 47 )

अतिथिः सदैव पूज्यः
सर्वे देवा वसन्ति तत्रैव।
क्षाम्यतु ममापराधं
क्षमासुधासारशोभिताः सन्तः।।

( 48 )

न च भवतोरपराधः
जगाद लीलाशुकः स्फुटं खेदात्।
भक्तिर्युवयोः शस्या
ममैव दम्भः प्रवञ्चनामकरोत्।।

( 49 )

कुरुतां क्षमां ममोपरि
शिवाशिवाविव कृपान्वितौ नितराम्।
लज्जा-ग्लानिभराहत
इति स प्रार्थ्य द्रुतं ततः प्रास्थात्।।

**( 50 )**

सर्वदृशः करकमले
करं स्वकीयं प्रदाय निश्चिन्तः।
वृन्दावनं प्रचलितः
श्रीहरिलीलासुधारसं वितरन्।।

**( 51 )**

बहिर्विलोचनहीनो
दीनः सन्तापतापितः सुतराम्।
अन्तश्चक्षुर्लेभे
करुणासिन्धोर्विलोकितो दृष्ट्या।।

**( 52 )**

पतितः पुनरुत्तिष्ठन्
गायन् गोविन्द माधवेत्येतत्।
क्षुधया पिपासयाऽसौ
क्लान्तः श्रान्तः समागमद्गहनम्।।

**( 53 )**

मूर्च्छा-पतितः श्रान्त्या
मृदुलकरस्पर्शचेतितः सहसा।
कोऽपि कृपालुस्तस्मै
भोज्यं पेयं प्रदाय तोषितवान्।।

**( 54 )**

सवितरि मुखं प्रतीच्या
श्चुम्बत्यनुरागरञ्जितं सद्यः।
स च निष्कारणबन्धु-
स्तमन्धपथिकं प्रबोधयन्नूचे।।

( 55 )

छायातरुं समाश्रय
पथिकजनानां समाश्रयं सुखदम्।
दिनपतिरस्तं यातो
धेहि करं मे नयामि तत्रैव।।

( 56 )

सोऽपि दयालुर्भक्तं
तत्रानीय प्रयातुमुद्युक्तः।
'मुञ्च करं मे सत्वर-
महमपि गन्तास्मि तामसी रजनी।।'

( 57 )

'आशु विमुञ्च करं मे
तमसि प्रगाढे न शक्यते गन्तुम्'।
इत्यभिहितोऽपि पथिको
दयालुना तेन नात्यजद्धस्तम्।।

( 58 )

निरुपममृदुलस्पर्शात्
किमपि सुखं नाम भावयन् भक्तः।
अशरण-शरणकरन्तं
ज्ञात्वा नैच्छद् विहातुमादत्तम्।।

( 59 )

बलवद् वेगात् स्वकरं
समाक्षिपन् दूरमागतः सोऽपि।
अन्धोऽपि प्रियमधिकं
सुखदस्पर्शं प्रभोस्तदा लब्ध्वा।।

( 60 )

आह्वयमानो हरिमपि
जगाद धीरं मुदं दधानोऽसौ।
करमाक्षिप्य च गच्छसि
गच्छ समर्थोऽसि वारयेत् कस्त्वाम्।।

( 61 )

विश्वात्मन्! तव शक्तिं
जाने विश्वैकपालने परमाम्।
जानीयां सामर्थ्यं
मोहन! मनसोऽपि निर्गतः स्यास्त्वम्।।

( 62 )

हस्तमुत्क्षिप्य यातोऽसि बलात् कृष्ण! किमद्भुतम्।
हृदयाद् यदि निर्यासि पौरुषं गणयामि ते।।

( 63 )

लीलारूपमुरलिका-
माधुर्य्याब्धौ निमग्न उन्मग्नः।
मधुरिपुनामगुणाली
गानं कुर्वन् ब्रजं स सम्प्राप्तः।।

( 64 )

प्रेम्णा निबध्य हृदये
तं ब्रजनाथं दयालुमासेव्यम्।
मुक्तस्तद्गुणगानं
कुर्वन् विवशीचकार गोविन्दम्।।

( 65 )

लीलागानरसामृतं कविरसौ भक्तः प्रवर्षन् मुदा
दिव्यानन्दतरङ्गिणीं व्रजकुले वेगेन प्रावाहयत्।
सर्वेशोऽपि हरिर्वशीकृतमना सख्यं नवं स्थापयन्
तत्कर्णे मुरलीरवं मधुमयं कृत्वा प्रदत्ते सुखम्।।

( 66 )

तत्प्रेमाहृतमानसेन हरिणा सान्निध्यमस्मै ददे
लीलगानरताय भक्तकवये वंशीरवः क्रियते।
भक्तिर्निर्मलमानसे स्फुरति सा श्रद्धाऽमला चन्द्रिका
कृष्णप्रेमसुधाम्बुधिप्रणयिनी कोऽपि प्रमोदार्णवः।।

( 67 )

तद्वीक्षा विकलने तेन कविना भक्तेन वाग्गुम्फिता
सानन्दं ललितोचिता रसमयी निर्व्याजप्रेमाप्लुता।
या रम्येह मधूक्तयः कतिपयाः तस्याः सुपेयाः क्षणं
ह्यानन्दं परमं धियञ्च विमलां यच्छन्तु वः प्रस्तुताः।।

( 68 )

'चातुर्यैकनिदानसीमचपलापाङ्गच्छटामन्थरं
लावण्यामृतवीचिलोलितदृशं लक्ष्मीकटाक्षादृतम्।
कालिन्दीपुलिनाङ्गनप्रणयिनं कामावताराङ्कुरम्
बालं नीलममी वयं मधुरिमस्वाराज्यमाराध्नुमः।।

( 69 )

किमिह कृणुमः कस्य ब्रूमः कृतं कृतमाशया
कथयत कथामन्यां धन्यामहो हृदयेशयः।
मधुर-मधुर स्मेराकारे मनोनयनोत्सवे
कृपण-कृपण कृष्णे तृष्णाचिरं बत लम्बते।।

**( 70 )**

आभ्यां विलोचनाभ्याममम्बुरुहविलोचनं बालम्।[1]
द्वाभ्यामपि परिरब्धुं दूरे मम हन्त दैवसामग्री।।

**( 71 )**

पीयूषं मुरलीनिनादजनितं पीत्वा प्रमोदोल्लसन्
ध्यात्वा पादसरोरुहं भगवतः कृष्णस्य कर्णामृतम्।
तस्यैवाङ्घ्रिसरोजमत्तमधुपो लीलाशुकः सुन्दरं
चक्रे भक्तिरसोज्ज्वलं सुमधुरं वृन्दावने गुञ्जनम्।।

*इति श्रीरामजीठक्कुरप्रणीते लीलाशुकीये काव्ये*
*चतुर्थः सर्गः समाप्तः।*

---

1. कृष्णकर्णामृतम् श्लो. सं. 3.42.43

# अथ पञ्चमः सर्गः

( 1 )

सा पीतो भवमङ्गला सुचरिता चित्तेन दिव्याऽमला
ध्यायन्ती चरणारविन्दयुगलं कृष्णस्य लीलाभृतः।
गायन्ती मधुरस्वरेण चरितं तन्त्रीस्वरैर्मेलितम्
श्रीचिन्तामणिमग्नमानससखी चिन्तामणिर्विद्यते।।

( 2 )

हृत्तन्त्रीतन्त्रजालं निखिलमिह समाश्लेषितं नूनमास्ते
तत्राप्यस्तीह कश्चित् प्रियजनविषये निश्चितं तद्विशेषः।
अक्षिस्फोटस्वरूपा ह्यघटत घटना मङ्गलस्यास्य यस्मिन्
तत्संख्यास्तत्र काले नयनयुगलतः प्रावहद्रक्तधारा।।

( 3 )

कोऽयं प्रेमप्रभावः कथयतु विदुषामग्रणीः श्रान्तबुद्धिः
शास्त्राभ्यासान्न शास्त्रेष्वितिबहुजटिलः साधितः प्रश्न एव।
तर्कैर्नैवात्र तोषः सुविमलमनसां मानसे गूढमेतत्
जानीते तद्रहस्यं सकलमपि स तां तत्मनो मित्रमेव।।

( 4 )

प्रीत्या चैकत्र चित्तं सरसमिह दृढं बध्यतेऽनन्यभावं
अद्वैतं हन्त! सैषा घटयति मृदुला मुक्तिसोपानरूपा।
दृष्ट्वा दूरादवस्थां प्रियजनमनसः सूचनाञ्चापि दत्ते
सा चेत् कृष्णेऽद्वितीये स च किल सुलभो जायते नात्र शङ्का।।

(5)

प्रेम्णः कामपि तस्य तामथ दशां द्रष्टुं समुत्कण्ठिता
साऽभूदिन्दुमुखी सखी शुचिमतिश्चिन्तामणिः साधिका।।
गायन्ती हरिमन्दिरेऽतुलगुणान् गोपीपतेः सुन्दरं
वृन्दारण्यगतं व्यबुध्यत शुभा तं मङ्गलं चेतसा।

(6)

चेतोमुक्तिविधायि बन्धनमिदं संस्कारभेदाद्ध्रुवम्
क्रूरं पीडकहिंसकं बहुविधैर्दुःखैः समालिङ्गितम्।
सत्यं, किन्तु परोपकारकरुणासिक्तं च दिव्यं सुखं
दत्ते मित्रमिवात्र प्रीतिमधुरं जानन्ति भक्ता जनाः।।

(7)

सा चिन्तामणिरत्र शान्तहृदयाऽऽसक्ता प्रभौ शाश्वते
सङ्गीतध्वनि-माधुरीरसभरैराराधयन्ती हरिम्।
लीना क्षिप्तमना बभूव सहसा गन्तुञ्च वृन्दावनं
राधामाधवकेलिलालितभुवं प्रास्थादरं सुन्दरी।।

(8)

वृन्दारण्यपथं विलोचनजलैः प्रक्षालयन्तीव सा
गायन्ती मधुरं मुदा हरिगुणान् वीणास्वनं तन्वती।
धीरा गीतपदैर्व्यथामपि निजामावेदयन्ती मुहु-
र्यान्ती सा खलु राधिकेव ललिता सद्भिः समालक्षिता।।

(9)

कलया मधुरेण चेतसा,
मधुवाचा परिसेवितो मुकुन्दः।
नयनाम्बुरुहस्रवज्जलैः
सुभगः सोऽपि सुपूजितोबभूव।।

( 10 )

हृदयं हि परीक्षते प्रभुर्विधिरस्मै बहुनैव रोचते।
सहजेन हृदा प्रपूजितो भजमानं मुदितो निरीक्षते।।

( 11 )

युगलस्य च तस्य मानसे भजतः प्रीतिभरेण निश्छलम्।
सहजत्वमनन्यभावना विदता तेन सुखं समीक्ष्यते।।

( 12 )

स च मङ्गलनामको द्विजो मधुवाचा भजतिस्म मङ्गलम्।
सहजेन हृदा न संशयः निपुणं वेद स एव सर्ववित्।।
कलयाऽप्यनयाहिनिश्छलं प्रभुपदपद्मनिबद्धमानसम्।
सकलञ्च समर्प्य तत्करे सखिभावेन स एव राधितः।।

( 13 )

कलगीतपदैरियं वधूर्भजमाना प्रभुमेव निर्भरम्।
प्रभुणेव करे धृता कथं बुबुधे नैव तदाश्रमं गता।

( 14 )

भजतामभिलाषपूरकः स्वजनं सङ्गमयन् निजेच्छया।
स्वजनेन सुमङ्गलाश्रयस्तनुते शर्म शुभञ्च शाश्वतम्।।

( 15 )

प्रविवेश यदा तदाश्रमं सुमनाश्चन्द्रमुखी सखी शुभा।
तपतिस्म रविः शिरस्तदा चलतां मध्यगतो विहायसः।।

( 16 )

लिखति स्म सुकाव्यमङ्गलं ललितं भव्यमुदारमादरात्।
प्रथमं गुरुनाम संस्मरन् निजचिन्तामणिमेव मङ्गलः।।

( 17 )

जयति गुरुश्चिन्तामणि रिह या सुपथं प्रकाशितं व्यदधात्।
प्रथमं सा खलु वन्द्या कृतज्ञभावेन सादरं मयका।।

( 18 )

भक्तकविः किल सहसा लोचनयुगलं प्रसारयन् पुरतः।
चिन्तामणिशुभनाम्नीं स्वगुरुं साक्षाद् ददर्श पूतात्मा।।

( 19 )

प्रीतिसुधारसभरिता समर्पितात्मा प्रिया च यामेऽभूत्।
पश्चाद् गुरुरिव पूज्याः पुण्यचयादेव दृश्यते सेयम्।।

( 20 )

सादरमस्यै दत्त्वा ससंभ्रमं शुभ्रमासनं पुरतः।
आनन्दाश्रुपयोभिः पादप्रक्षालनं चकारैषः।।

( 21 )

अपूपुजद् गुरुमेनां श्रद्धासहितं स मङ्गलः कामम्।
पुरतः प्रसादमकरोत् प्रभुणा प्रीत्या प्रदत्तमास्वाद्यम्।।

( 22 )

अपृच्छत् सा सुमुखी एष प्रसादः कुतस्त्वया लब्धः?
प्रदीयते प्रभुणाऽयं नित्यं मह्यं स चोत्तरं प्रादात्।।

( 23 )

स्मयमाना साऽवोचत् दत्तस्तुभ्यं त्वयैव भोज्योऽयम्।
कथमादेयो मयका प्रभुप्रसादोन दीयमानो मे।।

**( 24 )**

दुरभिनिवेशात्तस्यां
न च गृह्णन्त्यां हरिप्रसादं तम्।
कथमातिथेय एव
स्वयमपि भुञ्जीत धर्ममनुरुन्धन्।।

**( 25 )**

तत्र च बहुकालं तौ
त्यक्ताहारावतिष्ठतां भक्तौ।
भगवानपि मुदितोऽभूद्
दृष्ट्वाऽपूर्वां तयोश्च तां प्रीतिम्।।

**( 26 )**

अथागतः प्रेयस्या
राधारमणश्च राधया सहितः।
तदाश्रमे सुप्रीतो
राधाहस्तेन पायसं प्रादात्।।

**( 27 )**

स्वादु सुगन्धि मनोज्ञं
पायसमस्यै प्रदाय प्रीत्या सा।
प्रीतिसुधारसतुष्टा
निरुपमभक्तिं ददौ मुकुन्देऽस्मिन्।।

**( 28 )**

तौ तत्रैव हरिप्रिये मधुरसे वृन्दावने तं हरिम्
राधां प्रीतिमयीमुदारहृदयां स्वान्ते स्मरन्तौ सदा।
तन्नामस्मरणं तदीयचरितं चित्ते दधानाविमौ
तत्पादार्पितचेतसावविशतां तद्धाम दिव्यं परम्।।

( 29 )

वादयते मृदु वंशीं
बर्हापीडाय नीरदद्युतये।
श्रीकृष्णाय कृतिर्मे
समर्पिता तस्य प्रीतये भूयात्।।

( 30 )

नारायण-चरणस्मृति-
रस्ति निदानं सुपुण्यराशीनाम्।
तत्पुण्यान्यपि तस्मै
समर्पितानि प्रसीदताच्छ्रीशः।।

( 31 )

यास्त्रुटयोऽस्मिन् काव्ये
ता अपि तेनैव शोधनीयाः स्युः।
सुहृदालोचकवपुषा
कामे चिन्ता स एव जागर्ति।।

( 32 )

स्वान्तः सुखाय किञ्चि-
ल्लिखामि नित्यं न लिप्स्यते किञ्चित्।
सुखमनुभवामि सत्यं
कदापि काव्येन तोषयन् कञ्चित्।।

*इति श्रीरामजीठक्कुरेण कृतं*
*लीलाशुकीयकाव्यमविसतम्।*

# प्रेरणा-पुरुषः अब्राहमलिङ्कनः

**श्रीमन्नीलसरस्वत्युग्रतारैकजटाभ्यो नमः**

( 1 )

आगतविपदं पश्यन्
भीतिविमुक्तो दधन्मनोधैर्यम्।
प्रतिरोद्धुं यः प्रभवति
स वीरसंज्ञां दधाति सत्पुरुषः।।

( 2 )

स्वयमपि गच्छन्नग्रे
ह्यनुगतजनतां विलोकयन् विकलाम्।
समुद्धरन् दयमानः
सुवीरनेता स कथ्यते सद्भिः।।

( 3 )

लक्ष्यं निजमिह लभते
कोऽपि सुपुरुषः स्वकीयसंस्कारात्।
सुमतिर्दृढसंकल्पः
दैवं चास्मै सहायतां दत्ते।।

( 4 )

जन्मनि किल पूर्वस्मिन्
हृदये कलिता प्रियेव विद्यापि।
कथमप्युपैति पुरुषं
पुरोऽवरोधं बलान्निरस्यन्ती।।

(5)

जाने विपथं नयते
 जनमिह सत्यं बलीयसी नियतिः।
जनयति कृत्यं तामपि
 नियतं कर्मानुसारिणी साऽपि।।

(6)

मानवता गुणयोगात्
 पूजामाप्नोति सर्वदा लोके।
सर्वत्रैव सुधांशुः
 सन्नपि दूरे न पूज्यते लोकैः?।।

(7)

गुणिजनगुणगणनातः
 स्फुरति शुभाशेह मानसे सुधियाम्।
विपदाहतहृदयानां
 तमसि च पन्था प्रकाशमायाति।।

(8)

उषितवतः परदेशे
 पारेसिन्धु प्रसिद्धिमाप्तस्य।
वीरवरस्य कथैका
 लघ्वी बन्धो! निशम्यतां तावत्।।

(9)

संयुक्ते गणराज्ये
 ह्यमेरिकाख्ये क्वचिद्विपन्नायाम्।
ग्रामटिकायामभवद्
 दम्पत्योः कोऽपि बालकः सदने।।

( 10 )

नासीच्छ्रियोऽनुकम्पा
भवने तस्मिन् सुखाशयाशून्ये।
क्रीडन् क्लेशैर्बालो
नोदासीनः कदापि सञ्जातः।।

( 11 )

निर्वसु-कृषीवलस्य
प्रेयान् पुत्रः पितुश्च सोत्साहम्।
कृषिकर्मणि साहाय्यं
कुरुतेस्मासौ प्रसन्नचित्तः सन्।।

( 12 )

दिनमखिलं पशुचारण-
निरतो बालो वने निराहारः।
सञ्चिनुते स्मेन्धनमपि
श्रान्तः सायं समागमत् सदने।।

( 13 )

कृषिकर्मणि सह कुर्वन्
पितरं बहुधा स लालनीयोऽपि।
सिञ्चति शस्यं क्षेत्रे
पितुर्विवशतां निरीक्षमाणोऽसौ।।

( 14 )

परमभिलाषोऽध्ययने
समेधमानोऽस्य प्रेरयन्नासीत्।
यदि जीवनसुविकासं
वाञ्छसि विद्या समर्जनीया ते।।

( 15 )

पशुचारणकृषिकर्म-
श्रान्तोऽप्येष प्रयत्नवान् बालः।
रात्रावनलज्योतिषि
बुद्धिज्योतिः प्रकाशयन्नासीत्।।

( 16 )

मित्राणि च याचित्वा
पुस्तकमप्येष बालकोऽपाठीत्।
इङ्गालेन च भित्ता-
वभ्यस्यल्लग्नचेतसा गणितम्।।

( 17 )

न च कप्पिकापि सुलभा
विद्यासदनस्य चावृत्तं द्वारम्।
लेखन्यपि दुष्प्रापा
किन्तु समीहा बलीयसी तस्य।।

( 18 )

अचले शुभसंकल्पे
सुमतिसहाये प्रयत्नपरिपुष्टे।
सिद्धिश्चुम्बति चरणं
सुपथेचलतां निरन्तरं मन्ये।।

( 19 )

अलभत गुरोः प्रसादं
सेवामाचर्य्य यत्नतो धीरः।
वरमीश्वरोऽपि यच्छति
सुभक्तिमालोक्य निश्चितं भजताम्।।

( 20 )

श्रमभरशोषितकायो
निर्धनतायाः कटुं रसं पीत्वा।
वात्सल्यामृतपुष्टः
कथमपि दुःखं स विस्मरन्नासीत्।।

( 21 )

तदपि सुखं न च सेहे
विधिरतिवामः सुमेधसस्तस्य।
परलोकं नयमानो
जननीमपि तां कृतं च किं तेन!।।

( 22 )

हृदयं वज्राहतमिव
शून्यमिवाभूज्जगद् गतं सौख्यम्।
किन्तु सुधीरतयाऽसौ
निजसंकल्पं न विस्मृतिं निन्ये।।

( 23 )

प्रबलो वातः प्रवहतु
पर्वतखण्डाः पतन्तु वा मार्गे।
एकाकी प्रचलन्नपि
वीरः पश्चात् पदं न वै कुरुते।।

( 24 )

अक्षरसेवा नियतं
यशोऽक्षरं मानमादरं दत्ते।
वितन्वती गुणगौरव-
मर्चापात्रं करोति लोकानाम्।।

( 25 )

अष्टाविंशे वर्षे
स कर्मयोगात् सुबुद्धियोगाच्च।
विधिशास्त्रे प्रावीण्यं
प्रापल्लोके परां प्रसिद्धिञ्च।।

( 26 )

वाग्मी सदयो दान्तो
निजगुणगणतो मनोहरो वीरः।
सत्यपरायणचित्तः
सोऽभूत् ख्यातो विपन्नसेवातः।।

( 27 )

मनुजाधिकार-रक्षा-
व्रतं दधानः समुद्धरन् दीनान्।
लोकप्रियो यशस्वी
देशे सर्वोन्नतं पदं प्रापत्।।

( 28 )

इति वर्णितेतिवृत्तः
सुनागरोऽभून्महान् सुविख्यातः।
अब्राहम्लिङ्कन इति
पुरुषसुरत्नं न कस्य सम्मान्यम्।।

( 29 )

प्रथितो राष्ट्राध्यक्षो
भूत्वा लोकाय प्रेरणां प्रादात्।
निःसम्बलोऽपि कश्चि-
ल्लभते सिद्धिं जनः स्वसंकल्पात्।।

( 30 )

सन्नपि साधनहीनः
स्वेच्छाशक्त्या प्रयत्नमातन्वन्।
कोऽपि सुपुरुषो लभते
सिद्धिं लोकाय प्रेरणां यच्छन्।।

( 31 )

उन्नतिशिखरारूढः
कोऽपि मनस्वी जनान् समुन्नतिं नेतुम्।
बहुधा यतते सदयं
निवसति हृदये च धीमतां नूनम्।।

( 32 )

सन्नागरिकगुणानां
प्रसारहेतोः सुधोपमैर्वचनैः।
अमूमुदत् सुजनानां
पत्रमिषेणैष मानसं सुकविः।।

( 33 )

मनोरमा शुभबुद्धिः
कविता कान्तेव सद्‌गुणान् सुधियः।
शिक्षयते सुविलासै-
रिति मत्वा तामरीरचद्धीमान्।।

( 34 )

देशः सदैव वाञ्छति
वीरान् सुधियः सुविद्य-सच्चरितान्।
पुरुषार्थिनश्च पुरुषान्
तद्‌गुणयोगाय सुन्दरं गीतम्।।

( 35 )

सम्बोधयन् सुतस्या-
ध्यापकमेषोऽलिखच्च यत् पत्रम्।
तन्निदधानो हृदये
देशो गच्छेत् समुन्नतेः शिखरम्।।

( 36 )

तच्छृण्वन्तु भवन्तो
मधुर-सुपथ्यं सुधोपमं काव्यम्।
प्रशिक्षयन्त्वथ बालान्
विकाससरणिः प्रकाश्यतां नूनम्।।

( 37 )

अध्यापक! प्रियसुतस्य भवन्ति नैव
लोकाः समे जगति सत्य सुनीतिनिष्ठाः।
पुत्रः पठेदिह कदापि ममेति पाठं
किन्तु त्वया मनसि तस्य निवेश्यमेतत्।।

( 38 )

दुष्टा भवन्ति परदुःखविधानदक्षाः
निष्कारणं विगतसंशयमेतदस्ति।
किन्त्वत्र निर्भयमना अपि साधुलोक-
स्तद्दुष्टतां दमयितुं निपुणः प्रकामम्।।

( 39 )

सत्यं भवन्ति कुटिला ननु! राजनीति-
दुष्टाशया निजसुखैकनिबद्धचित्ताः।
किन्त्वत्र सर्वजन ताप-शमैकनिष्ठाः
सर्वस्वदानरसिकाः किल साधवोऽपि।।

( 40 )

वैरप्रदूषितधियो जगतीह सत्यं
ध्वंसं भयं विदधते नितरां यथैव।
सन्तः सदा सकलमङ्गललग्नचित्ताः
कारुण्यसिक्तमनसः सुहृदस्तथैव।।

( 41 )

सर्वं न चैकपद एव सुपाठनीयं
पूर्वं त्वया मनसि तस्य समङ्कनीयम्।
स्वीयश्रमेण यदि चैककणोऽपि लभ्यः
कोटेर्विना श्रममसौ बहुवर्णनीयः।।

( 42 )

काले पराजयशुचं निजधीरभावात्
पुत्रः सहेत विजयोत्थसुखं तथैव।
सर्वं यथा प्रकटयेत् स च संयमेन,
सम्पाठयेदिति भवान् कृपया सुतं मे।।

( 43 )

दष्टो भवेन्न च कदापि मदीयपुत्रो
द्वेषाहिनाऽथ कलितो न तु वेर्ष्ययापि।
स्वीयं सुखं यदि परस्य तुदेन्मनो वा
वाच्यं न तद् वदतु वा स तु संयमेन।।

( 44 )

प्रशिक्षयतु दुर्जनान् दमयितुं सुतं मे भवान्
न जातु पुरतः पतेद् विवश एष तेषां पुरः।
प्रदर्शयतु वाङ्मयं विभवमेनमत्यद्भुतं
निसर्गसुषमेक्षणे दृगपि तस्य सम्प्रेर्यताम्।।

( 45 )

स पश्यतु नभोङ्गने सुभगमुत्पतन्तं खगं
तथा च कनककातपे मधुरगुञ्जनं कुर्वत:।
अलीनथ फलं तरौ पवनकम्पमानं मुहु:
यथा भवतु मानसं प्रकृतिपेशलं तस्य वा।।

( 46 )

सुवेदयतु मत्सुतं निजधिया च वाङ्मन्दिरे
कुनीतिसमुपागता सफलता न रोचेत ते।
स्वतश्च समुपस्थिता विफलतैव वा जायताम्
छलेन रिपुघातको भवतु नैष वीर: सखे!।।

( 47 )

विचारदृढता परा भवतु शेमुषीप्रत्यय:
परेषु विहसत्सु वा न च सुतो विवेकं त्यजेत्।
सदैव सुहृदा समं लसतु सौहृदं निर्मलं
परन्तु रिपुमर्दने न च कदापि दैन्यं भजेत्।।

( 48 )

प्रबोधयतु मे सुतं स च सदैव दूरे वसेत्
सदाऽवसरसङ्गितो भवति सा परा चातुरी।
इयं परमवीरता निपुणतेति नि:संशयम्
तदेव हृदयङ्गमं प्रकुरुतान्मदीय: सुत:।।

( 49 )

श्रुत्वा वचनमन्येषां धिया संशोध्य गृह्यताम्।
एवं तस्य स्वभाव: स्यात् सत्यनिष्ठा न संशय:।।

( 50 )

बहिर्भवत् स्वकं दु:खं हृदये सन्निवेशयन्।
प्रसन्नवदनस्तिष्ठेदिति शिष्य: प्रबोध्यताम्।।

( 51 )

अश्रु मुञ्चन्न लज्जेत प्राणिनो वीक्ष्य पीडितान्।
कथं दुष्टै: स वर्त्तेत त्वया शिष्य: प्रशिक्ष्यताम्।।

( 52 )

सावधान: पुन: कार्य: स सदा स्तुतिपाठकात्।
भूयानर्थो ग्रहीतव्यो मत्या च वपुषापि वा।।

( 53 )

विक्रेतव्यो न चैवात्मा महत्यां वा विपद्यपि।
धिक्कुर्वत्स्वपि दुष्टेषु चिन्ता कार्या न जातुचित्।।

( 54 )

यद् वा सत्यं या च नीति: प्रशस्ता
तत्पक्षं वै गृह्णतो निर्भयस्य।
यो वा स्वादो जायते या महत्ता
सर्वञ्चैतज्ज्ञापनीयश्च शिष्य:।।

( 55 )

स्नेह: कार्य्यस्तेन साकं न दोष:
गोप्यस्तावत् तच्चरित्रस्य हानौ।
लोहस्तावत् तापमप्रापित: सन्
कच्चिद् दृष्टो वज्रसारीकृतात्मा।।

( 56 )

अधीरताऽप्यत्र निजार्थसाधने
सदैव धीरत्वमपेक्षते ध्रुवम्।
तथैव वीरत्वनिदानमेतत्
सुपाठ्यतां सत्यमिदं सुतो मे।।

( 57 )

आत्मविश्वासमाप्नोतु मत्सुतो येन तत् कुरु।
सदैव हृदि संधार्या श्रद्धा तेनेति बोध्यताम्।।

( 58 )

मम प्रिय पुत्राध्यापक!
क्षन्तव्यं यन्मयोक्तमत्यर्थम्।
कुरु मे सुतस्य हेतो-
यद्वा कर्तुं भवान् समर्थः स्यात्।।

( 59 )

पत्रच्छलेन शिक्षां यच्छन् लोकाय सुव्रतो वीरः।
अतिष्ठिपद् भुवि विमलां कीर्त्तिं लोकप्रसादिनीं परितः।।

( 60 )

उदयन् रविः सरोजं विकासयन् कोकमानसे मोदम्।
कुरुत किन्तु सशोको ह्युलूकलोकोऽत्र जायते नितराम्।।

( 61 )

यस्मिन्नुदयं याते सर्वे लोकाः प्रकाशमायान्ति।
जीवनपथः प्रशस्तः राहुग्रासश्च जायते सोऽपि।।

**( 62 )**

भास्वान् हन्त! विकासयन् जनमनः पद्मानि ग्रस्तो हठात्
लोकाह्लादविधायकः कुमुदिनीबन्धुर्ध्रुवं पातितः।
छिन्नश्चन्दनपादपः सुरभितां कुर्वन् धरां निर्दयम्
क्रूरः कोऽपि जघान तं च गुलिकां प्रक्षिप्य विद्वेषतः।।

**( 63 )**

निःसाधनोऽपि साध्यं
निजसंकल्पादवाप यो धीरः।
मनसा नमस्कृतिर्मे
तस्मै वीराय भास्वते महसा।।

**( 64 )**

लग्नमना निजलक्ष्यं
स्वेच्छाशक्त्या प्रयत्नमातन्वन्।
लभते कोऽपि मनस्वी
यच्छति लोकाय प्रेरणां प्रगतौ।।

*इति श्रीरामजीठक्कुरप्रणीतप्रेरणापुरुषोऽब्राह्मलिङ्कननामकं*
*लघुकाव्यमवसितम्।।*

## लेखकपरिचयः


| | | |
|---|---|---|
| नाम | : | डा. रामजीठक्कुरः |
| पत्रसङ्केतः | : | ग्रा. धर्मपुरः, पत्रालयः लोहनारोड<br>जि. दरभंगा-847407, (बिहार) |
| जन्मस्थानम् | : | फुलगामा (नेपाल) |
| जन्मतिथिः | : | 12/05/1935 ई. |
| अध्यापनम् | : | आचार्यचरः, संस्कृतविभागः<br>ललितनारायण मिथिला<br>विश्वविद्यालयः, कामेश्वर-<br>नगरम्, अधिदरभङ्गम् |


प्रकाशितरचनाः :

(1) वैदेहीपदाङ्कम्

(2) राधाविरहम्

(3) बाणेश्वरीचरितम्

(4) मातृस्तन्यम्

(5) गोविन्दचरितामृतम्

(6) आर्याविलासः

(7) प्रेमरहस्थम्